वर्षम्-३ अङ्कः-११

# संस्कृतवार्ता

राष्ट्रियसंस्कृतसंस्थानस्य त्रैमासिकं वार्तापत्रम्

युगाब्दः ५११२-१३ वैक्रमाब्दः २०६७ पौष-कृष्ण १२ - चैत्र-कृष्ण १२ शकः १९३२-३३ जनवरी - मार्च २०११

## कुलपतिवाक्

विदन्त्येव विज्ञा यत्साम्प्रतिकोऽयं कालो यूनां काल इति। अस्माकं देशे जनसंख्यायां सप्ततिप्रतिशतं सन्ति युवानः। ते च भारतीयलोकतन्त्रे देशाभ्युदये च आत्मनोऽवदानं प्रकटीकर्तुं सन्नह्यन्ते। संस्कृतस्यापि तारुण्यम् आत्मानं सम्प्रति प्रत्यभिजानाति, प्रत्यभिज्ञाप्रत्ययेन चाविष्करोति सम्भावनानां नवीनाः सरणीः। तथाहि राष्ट्रियसंस्कृतसंस्थानस्यैव शृङ्गेरीपरिसरच्छात्रेण स्वप्रतिभया अमेरिकादेशात् निबन्धस्पर्धायां पुरस्कारः समुपलब्धः, लखनऊपरिसरस्य च छात्रः शान्ताकुमारोनेगीः हिमालयबौद्धसांस्कृतिकपर्यटनकार्यक्रमे फिनलैण्ड्-एष्टोनिया-लाटविया-नार्वे-स्विटज़रलैण्ड्-आस्ट्रिया-हालैण्ड्-हङ्गरी-फ्रांस्-इंग्लैण्ड्देशानां यात्रां कृत्वा तत्तद्देशेषु बौद्धविद्याया प्रसारमन्वशीलयत्। संस्थानस्य नैके छात्राः कनिष्ठशोधवृत्तिं JRF इति संज्ञप्तां प्राप्नुवन्।

आगामिनः सत्रस्य कृते शिक्षाशास्त्रि-शिक्षाचार्य-विद्यावारिधिपाठ्यक्रमेषु प्रवेशार्थं देहलीस्थ-श्रीमल्लालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठ-तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठ-राष्ट्रियसंस्कृत-संस्थानानां सामान्या प्रवेशपरीक्षा भविष्यतीति हर्षकरी वार्ता। एतेन न केवलं संस्कृतजगतः सहकारः सम्भूयमुत्थानं प्रकटीभवेत्, छात्राणां कृते सौकर्यं सौविध्यं च व्यवस्थाप्येत।

संस्कृतभाषाया नवोन्मेषस्य नूतनसम्भावनानां चायं कालो वरीवर्तीति न संशीतिः। अयं नवोन्मेषो नवीनाश्च सम्भावनाः समसामयिके संस्कृतसाहित्येऽपि प्रतिफलन्त्यो विभाव्यन्ते। राष्ट्रियसंस्कृतसंस्थानेन एतादृशानामुत्तमोत्तमरचनाकाराणां लुप्तप्रायस्य साहित्यस्य पुनरुद्धाराय पुनःप्रकाशनाय च पदक्षेपो व्यधायि। अस्मिन्नुपक्रमे ग्रन्थावलीरूपेण भट्टमथुरानाथशास्त्रिणां रतिनाथझावर्याणां मूलशङ्करमाणिक-लालयाज्ञिकस्य च समग्राः रचनाः जनकशङ्कर-मनुशङ्करदवेविरचिता नाट्यत्रयी च प्रकाशिताः। हर्षस्यायं विषयो यद् रूपकत्रयी ग्रन्थकर्तृणां श्रीमतां जनकशङ्कर-मनुशङ्करदवेवर्याणां जन्मशतीवर्षे प्रकाशं गता। लोकप्रियसाहित्यग्रन्थमालायां सुकविश्रीरामजीठक्कुरकृता लघुप्रबन्धत्रयी अपि अस्मिन्नेव वर्षे संस्थानेन प्रकाशिता। प्रौढरचनासु महामहोपाध्यायगोकुलनाथस्य शिवशतकं नामापूर्वमेव विद्यते काव्यम्। महावाक्यायमानस्यास्य काव्यस्य पदप्रकाशिकाख्या व्याख्या व्यरचि पण्डितप्रवरेण रमाकान्तपाण्डेयेन। पदप्रकाशिकासहितं शिवशतकमपि संस्थानस्य गौरवग्रन्थमालाया प्रत्यग्रं प्रसूनं विकिरति सौरभम्। अस्मिन्नेव वर्षे विश्वसंस्कृतपुस्तकमेलाया आयोजनेन संस्कृतसाहित्यस्य नूतनता भव्यता च संसारस्य पुरः अभूतपूर्वमेव आविरभवत्।

संस्कृतवार्ताया अयम् अङ्कः नूतनसंवत्सरारम्भे प्राकाश्यमायाति। सर्वान् सुधियः सहृदयान् संस्कृतसमाजस्य च सदस्यान् आभिः शुभकामनाभिर्वर्धापयामः -

**काष्ठासु प्रथयन् स्वदेशगुरुतां काष्ठां परां च व्रजन्**
**कल्याणस्य च मङ्गलं च जगतः सम्भावयन् सर्वतः।**
**शिल्पैस्तैः कुशलैः कृतीविरचितैः नानाकृतीभ्राजितैः**
**सञ्जायेत कलामयः शिवमयः संवत्सरो नूतनः।।**

**मिथ्याख्यातिमपास्य चापि सदसत्ख्यातिं निराकृत्य वै**
**ख्यातिं कामपि चान्यथेति कथितां नो संस्पृशन् गौरवात्।**
**ख्यातिं तां वचनीयताविषयताक्रान्तां गतो भूयसा**
**सत्ख्यातिं परमां व्रजेत् सुमहतीं संवत्सरो नूतनः।।**

*-राधावल्लभः त्रिपाठी*




पूर्वोत्तरसंस्कृतसम्मेलने ग्रन्थलोकार्पणस्य किञ्चन दृश्यम्



१५तमविश्वसंस्कृतसम्मेलनविषये ग्रीकदेशीयेन निकोलसकजानसेन सह परामर्शं कुर्वन् कुलपतिः राधावल्लभः त्रिपाठी



बेङ्गलूरुनगरे संस्कृतवार्तायाः पूर्वतनाङ्कं लोकायार्पयन्तः विद्वांसः

### मुख्यपरामर्शदाता

आचार्यः राधावल्लभः त्रिपाठी

कुलपतिः

राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

### परामर्शदातृमण्डलम्

आचार्यः रामानुजदेवनाथः, नवदेहली

प्रा. जि. गङ्गन्ना, पुरी

प्रा. विश्वमूर्तिशास्त्री, जम्मू

प्रा. आजादमिश्रः, भोपालम्

प्रा. के. टी. माधवन्, गुरुवायूरु

प्रा. अर्कनाथचौधरी, जयपुरम्

प्रा. ए. पि. सच्चिदानन्दः, शृङ्गेरी

प्रा. सुरेन्द्रझाः, लखनऊ

प्रा. एम. ए. बाबुः, मुम्बई

प्रा. प्रकाशपाण्डेयः, इलाहाबादम्

प्रा. के.बी. सुब्बरायुडुः, गरली

### सम्पादकमण्डलम्

डा. शुक्ला मुखर्जी

डा. रत्नमोहनझाः

कू. वेङ्कटेशमूर्तिः

प्रफुल्लगडपालः


'संस्कृतवार्ता'-सम्बद्धं स्वीयाभिप्रायम्, अत्र प्रकाशनयोग्याः कार्यक्रमवार्ताः च अधोलिखित-ई.मेल् सङ्केतेन प्रेषयन्तु-
**samskritavarta@gmail.com**


## संस्कृतवार्ता

राष्ट्रियसंस्कृतसंस्थानस्य त्रैमासिकं वार्तापत्रम्

ISSN : 975-2676

प्रकाशकः

**राष्ट्रियसंस्कृतसंस्थानम्**

(मानितविश्वविद्यालयः)

56-57, इन्स्टीट्यूशनल् एरिया, जनकपुरी,

नवदेहली-110058

011-28524993, 28521994, 28520977

email : rsks@nda.vsnl.net.in

website : www.sanskrit.nic.in


## प्रतिवार्ता




राष्ट्रियसंस्कृतसंस्थानेन 'संस्कृतवार्ता' इत्येन्नाम्नी या त्रैमासिकी पत्रिका प्रकाश्यते तदर्थं कुलपतिः, परामर्शदातृमण्डलं, सम्पादकमण्डलं च अभिनन्दनानि अर्हन्ति। कस्याः अपि पत्रिकायाः प्रवर्तनं सरलं भवति किन्तु तस्या नैरन्तर्यं समयतः प्रकाशनं चातिकठिनं भवति। 'संस्कृतवार्ता' प्रायः समयतः शुद्धतया सुन्दरतया च प्रकाश्यमाना अग्रेसरतीति हर्षस्य विषयः। संस्थानस्य तत्परिसराणां च गतिविधीनां दर्पणत्वेनेयं पत्रिका जयति। परिसरानतिरिच्य अन्येषामपि संस्कृतसंस्थानानां संस्कृतविश्वविद्यालयानां च गतिविधीनां सङ्केतोऽत्र कर्तुं पार्येत तदा पत्रिकायाः क्षेत्रं विस्तृततरं भवेत्। पत्रिकायाः प्रकाशनार्थं 'संस्कृतवार्ता'सम्बद्धा जनाः वर्धाप्यन्ते।

**रमाकान्तशुक्लः**
प्रधानसम्पादकः 'अर्वाचीनसंस्कृतम्'
एवञ्च शास्त्रचूडामणिविद्वान्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

## पण्डित-श्रीगौरीनाथशास्त्रिव्याख्यानमाला आयोजिता

नवदेहलीस्थ-राष्ट्रियसंस्कृतसंस्थानेन कोलकातास्थ-श्रीसीतारामवैदिकादर्श-संस्कृतमहाविद्यालयस्य साहाय्येन पण्डित-श्रीगौरीनाथशास्त्रिस्मृतिव्याख्यानमाला ०२.०२.२०११ दिनाङ्के कोलकातास्थ-महामिलनमठसभागारे समायोजिता। व्याख्यानमाला-कार्यक्रमेऽस्मिन् श्रीसीतारामवैदिकादर्शसंस्कृतमहाविद्यालयस्य सभापतिः आचार्यः दिलीप-कुमारकाञ्जीलालः अध्यक्षत्वेन, आचार्य-अभिराजराजेन्द्रमिश्रः मुख्यवक्तृत्वेन, आचार्यः मानवेन्दुबन्धोपाध्यायः मुख्यातिथित्वेन च सभामलङ्कृतवन्तः। कार्यक्रमेऽस्मिन् सारस्वतातिथित्वेन आचार्यौ श्यामलेन्दुबनर्जी-सीतानाथाचार्यौ वेदिकां शोभितवन्तौ। अस्याः व्याख्यानमालायाः विषयस्तावत् 'अर्वाचीन-संस्कृतरचनाधर्मिता काव्यशास्त्रं च' इति आसीत्। कार्यक्रमारम्भे श्रीसीताराम-वैदिकादर्शसंस्कृतमहाविद्यालयस्य प्राचार्यः डा. सोमेशकुमारमिश्रः अतिथीनां स्वागतं व्याहरत्। कार्यक्रमान्ते राष्ट्रियसंस्कृत-संस्थानस्य परियोजनाधिकारी डा. शुक्ला मुखर्जी धन्यवादज्ञापनम् अकरोत्।




कार्यक्रमे भाषमाणः आचार्यः अभिराजराजेन्द्रमिश्रः

## सेवानिवृत्ताः

जनवरीमासतो मार्चमासं यावत् संस्थानमुख्यालये कार्यरताः इमे संस्थानसदस्याः सेवाकालं समाप्य अवकाशं प्राप्तवन्तः-

- श्रीमती कुन्ती ज्ञानचन्दानी ३१.०१.११
- श्री आई.के. गुप्ता २८.०२.११
- श्रीरमेशचन्द्रहोता ३१.०३.११
- श्रीमती भारतमल्होत्रा ३१.०३.११

संस्थानपरिवारः एतेषां सुखदजीवनं कामयते।

# भव्यतया सम्पन्ना विश्वसंस्कृतपुस्तकमेला



शब्दवेदं लोकार्पयन्तः बी.एस. येदुरप्पा प्रमुखविभूतयश्च

राष्ट्रियसंस्कृतसंस्थानप्रमुखाभिः देशस्य संस्कृतसंस्थाभिः ०६-१० जनवरी, २०११ इत्यवधौ कर्णाटकराज्यस्य बेङ्गलूरुस्थ-नेशनल्-कालेज्-ग्राउण्ड्, बसवनगुडी इत्यत्र ऐदम्प्राथम्येन काचित् विशिष्टा विश्वसंस्कृतपुस्तकमेला समायोजिता। आयोजकसंस्थासु राष्ट्रियसंस्कृतसंस्थानं, कर्णाटकशासनं, विभिन्नराज्यस्थिताः संस्कृतविश्वविद्यालयाः संस्कृताकादम्यः, संस्कृतसंवर्द्धनप्रतिष्ठानं, प्राच्यविद्यासंशोधनसंस्थानानि, राष्ट्रियपाण्डुलिपि-प्रतिष्ठानम्, अखिलभारतीयसंस्कृतप्रकाशकसङ्घः इत्यादीनि इमानि संस्थानानि प्रामुख्यं भजन्ते। संस्कृतभारतीसङ्घटनस्य संयोजने मेलेयं भव्यतया सुव्यवस्थितरूपेण च प्रवृत्ता।

सामाजिकेषु विद्वत्सु च संस्कृतग्रन्थपठनाभिरुचिं संवर्द्धयितुं संस्कृतस्य लोकप्रियतां च उद्दीपयितुं विश्वसंस्कृतपुस्तकमेलेयं सार्थक्यं गता। विश्वसंस्कृतपुस्तकमेलेयं संस्कृतसम्बद्धग्रन्थानां विक्रयकेन्द्रापेक्षया भारतीयसंस्कृतेः भारतदर्शनस्य च किञ्चित् मेलनस्थलं प्रतिभाति स्म। पुस्तकमेलकाङ्गतया व्याख्यानमालाकार्यक्रमाः, चर्चासत्राणि, संस्कृतप्रचारकार्यशालाः, प्रदर्शिन्यः, सांस्कृतिककार्यक्रमाः, कविसम्मेलनानि ग्रन्थलोकार्पण-कार्यक्रमाश्च वैभवतया सुसम्पन्नाः।

विश्वसंस्कृतपुस्तकमेलकस्य प्रथमे दिने ०६.०१.२०११ दिनाङ्के भारतीयक्रिकेटसमूहस्य क्रीडालुः श्रीअनिलकुम्बले 'ज्ञानगङ्गा' (भारतीयपरम्परा) इत्यस्याः प्रदर्शिन्याः समुद्घाटनमकरोत्। कर्णाटकसर्वकारस्य प्रारम्भिक-माध्यमिकशिक्षामन्त्री कागेरी श्रीविश्वेश्वरहेगडे संस्कृतग्राममुद्घाटयन् संस्कृतस्य उज्ज्वलभविष्यकामनामकरोत्। कार्यक्रमेऽस्मिन् भारतशासनस्य मुख्यनिर्वाचनायुक्तचरः एन. गोपालस्वामी मुख्यातिथित्वेन सभां सम्बोधयत्। अस्मिन्नैव दिने विद्वान् विद्याभूषणः रसमञ्जरीत्याख्यं कार्यक्रमं सम्पादयत्।



कार्यक्रमे भाषमाणः अनिलकुम्बले

०७.०१.२०११ दिनाङ्के नादस्वरवादनमिति कार्यक्रमः सञ्जातः। तदनु न्यायमूर्तेः एम.एन. वेङ्कटाचलय्यस्य आध्यक्ष्ये कार्यक्रमः प्रचलितः। ततः कर्णाटकस्य मुख्यमन्त्री श्री बी. एस. येदुरप्पा सम्मेलनस्य समुद्घाटनमकरोत्। अवसरेऽस्मिन् उत्तराखण्डराज्ये संस्कृतं द्वितीयभाषात्वेन अङ्गीकारितवतः श्रीरमेशपोखरियाल-'निश्शङ्क'स्य विशिष्टं सम्माननमभवत्। कार्यक्रमेऽस्मिन् मुख्यातिथित्वेन सांसदः श्री अनन्तकुमारः, जर्मनीस्थ-हाम्बोल्ट्-विश्वविद्यालयस्य प्राध्यापिका डा. (श्रीमती) एनेट् श्चेमिड्चेन्, कर्णाटकशासनस्य मुख्यकार्यदर्शी श्री एस. वी. रङ्गनाथः, सेञ्चुरी-ग्रुपसंस्थायाः अध्यक्षः डा. दयानन्द वै विभिन्न-राज्यस्थितानां संस्कृतविश्वविद्यालयानां कुलपतयः आचार्याः वाचस्पत्युपाध्याय-पङ्कजचान्दे-राधावल्लभत्रिपाठि-हरेकृष्णशतपथि-पङ्कजजानी-नीलकण्ठपति-सुधाराणीपाण्डे-जे. प्रसाद-मोहनगुप्ताश्च उपस्थिताः आसन्। अस्मिन्नेवावसरे चर्तुणामपि वेदानां सङ्कलनरूपः 'शब्दवेदः' इति ग्रन्थः लोकायार्पितोऽभूत्। अपराह्णे न्यायमूर्तेः एम. रामाजोयिसवर्यस्य विशिष्टोपस्थितौ श्रीलक्ष्मीकान्तशर्म-रमाकान्तगोस्वामि-आचार्य जि.वेङ्कटसुब्बय्य-नरेन्द्रकोहली-आचार्यरामकरणशर्म-आचार्यसत्यव्रतशास्त्रि-भाग्येशझा-श्रीकृष्णसेमवाल-स्थाणेश्वरतिमल्सिन् (अमेरिका)-आचार्यराजेन्द्रमिश्र-श्रीदेवशर्मप्रमुखाणां मुख्यातिथ्ये ग्रन्थलोकार्पणकार्यक्रमः सुसम्पन्नः।




'ज्ञानगङ्गा'-प्रदर्शिन्याः द्वारस्य दृश्यम्

०८.०१.२०११ दिनाङ्के पुस्तकमेलायाः प्रमुखाकर्षणं महिलासम्मेलनमासीत्। अत्र अध्यक्षपदं मध्यप्रदेशशासनस्य माध्यमिकशिक्षामन्त्री श्रीमती अर्चनाचिट्नीस अलङ्कृतवती। श्रीमती सुदर्शना, डा. सुधाराणीपाण्डे, डा. दीप्तित्रिपाठी, डा. सरोजा भाटे, डा. दीक्षितपुष्पा च अवसरेऽस्मिन् वेदिकामलङ्कुर्वन्। तदनु सम्पन्ने विज्ञानसम्मेलने मुख्यातिथ्यौ डा. के. राधाकृष्णः (अध्यक्षः, आई.एस.आर.ओ.) श्रीमनुबलिगारः (कन्नडसंस्कृतिविभागनिदेशकः) च सभां संशोभयताम्। संस्कृतविज्ञानयोः मिथः सम्बन्धविषये डा. रोद्दमनरसिंहः, (विज्ञानी), एस. गुरुमूर्तिः (आर्थिकपरामर्शदाता लेखकश्च), आचार्यः वी.महादेवन् (सङ्घायाध्यक्षः, आई. ए. एम. बेङ्गलूरु) अरुणरामरत्नम् (तकनीकीविशेषज्ञः, विक्किपीडिया) इत्यादयोऽभाषन्।

मु ख्या ल य वा र्ता

मुख्यालयवार्ता



सङ्गोष्ठ्याः किञ्चन दृश्यम्

अस्मिन्नैव दिने अपराह्णे प्रचलिते विद्वद्गोष्ठी-कार्यक्रमे राजस्थानशासनस्य परिवहन-संस्कृतशिक्षणभाषामन्त्री श्रीब्रजकिशोरशर्मा, राजस्थानविश्वविद्यालयस्य कार्यवाहकुलपतिः आर. पी. जैनः, राजस्थानसाहित्यसम्मेलनस्य महासचिवः डा. मोतीलालजोशी च मुख्यातिथित्वेन सभां सम्बोधितवन्तः। "संस्कृतशिक्षायाः नूतनपरिप्रेक्ष्यम्" इति विषयमाधृत्य आचार्याः राधावल्लभत्रिपाठि-रामकरणशर्म-सुधाराणीपाण्डे-देवर्षिकलानाथशास्त्रि-प्रभृतयो विद्वांसः स्वाभिप्रायं प्राकटयन्। तदनु कर्णाटकशासनस्य गृहपरिवहनमन्त्रिणः श्रीमतः आर. अशोकस्य उपस्थितौ प्रसिद्धो गायकः डा. एस. पी. बालसुब्रह्मण्यम् सांस्कृतिकं कञ्चन कार्यक्रमं प्रास्तौत्।


पुस्तकमेलायां मञ्चस्थाः वामतः आचार्यः राधावल्लभत्रिपाठी, डा. डी. पुरन्देश्वरी, श्री एन्. गोपालस्वामी च

०९.०१.२०११ दिनाङ्के भारतशासनस्य मानवसंसाधनविकासराज्यमन्त्री डा. डी. पुरन्देश्वरी युवसम्मेलनस्य उद्घाटनमकरोत्। अत्र मुख्यातिथिरूपेण कर्णाटकशासनस्य उन्नतशिक्षणविभागस्य प्रधानकार्यदर्शी श्री एम. मदनगोपालः उपस्थितः आसीत्। तदनु प्रचलिते कविसम्मेलने ('कविभास्करी' इति तृतीयेऽखिलभारतीयसंस्कृतसमवाये) कन्नडपुस्तक-प्राधिकारस्य अध्यक्षः डा. सिद्धलिङ्गय्यः मुख्यातिथिः आसीत्। सारस्वतातिथित्वेन आचार्य-रामकरणशर्म-आचार्यराजेन्द्रमिश्रौ सभामलङ्कृतवन्तौ। कविसम्मेलनेऽस्मिन् आचार्य-रामकरणशर्म-आचार्यराजेन्द्रमिश्र-आचार्यराधावल्लभत्रिपाठि-आचार्यविन्ध्येश्वरीप्रसादमिश्र-आचार्यदेवर्षिकलानाथशास्त्रि-आचार्य वी.कन्नन्-आचार्यरमाकान्तशुक्ल-आचार्यहर्षदेवमाधव-आचार्यरामानुजदेवनाथ-आचार्या (श्रीमती) मनुलताशर्म-डा. दीक्षितपुष्पा-डा. रामविनयसिंह-डा. आर.गणेश-डा. भागीरथिनन्द-डा. रामकुमारशर्म-डा. नारायणदास-परमानन्दझा इत्येते कवयः काव्यपाठं प्रास्तुवन्। अस्य कार्यक्रमस्य सञ्चालनम् आचार्यः इच्छारामद्विवेदी अकरोत्।

तस्मिन्नेव दिने अपराह्णे प्रवृत्ते संस्कृतसङ्गमकार्यक्रमे सर्वोच्चन्यायालयस्य मुख्यन्यायाधीशचरः न्यायमूर्तिः आर. सी. लाहोटी अध्यक्षत्वेन उपस्थितः आसीत्। अत्र विविधसंस्थानां लब्धख्याताः जनाः स्वाभिप्रायं प्राकटयन्।

१०.०१.२०१० दिनाङ्के संस्कृतप्रकाशनविषयिणी काचित् सङ्गोष्ठी मेलाङ्गतया आयोजिता आसीत्। ततश्च विद्यालयीयच्छात्राणां सामाजिकानां च कृते विविधकार्यक्रमाः आयोजिता अभवन्।

इत्येवम् अस्मिन् विश्वसंस्कृतपुस्तकमेलके विविधाः कार्यक्रमाः तदा तदा प्रचलिताः। संस्थानकुलपतेः आचार्य-राधावल्लभत्रिपाठिनः एते नवीनाः संस्कृतग्रन्थाः अस्यां मेलायां विशिष्टे पुस्तकलोकार्पणकार्यक्रमे विमोचिताः-

१. **अन्यच्च** (मौलिकः संस्कृतोपन्यासः)

२. **स्मितरेखा** (मौलिकः संस्कृतकथासंग्रहः)

३. **विश्ववारा** (अनूदितानां विश्वकथानां संग्रहः, सम्पादितः)

४. **आत्मनाऽऽत्मानम्** (संस्कृते दैनन्दिनी)

५. **रूमीरहस्यम्** (रूमीकवेः कवितानां रूपान्तरम्)

६. **रूमीपञ्चदशी** (रूमीकवेः कवितानां रूपान्तरम्)


'कविभास्करी'-अखिलभारतीयसंस्कृतकविसमवायस्य किञ्चन दृश्यम्

**संस्कृतसाहित्यसौरभ** (तृतीयो भागः) इति हिन्दीभाषाग्रन्थोऽपि आचार्यराधावल्लभत्रिपाठिप्रणीतः सस्ता-साहित्य-मण्डल इत्यनया संस्थया प्रकाशितः, अस्मिन् कार्यक्रमे लोकार्पितः।

अस्यां मेलायाम् आहत्य ३०० नूतनाः ग्रन्थाः लोकायार्पिता अभवन् अपि च प्रायः १२ लक्षमिताः ग्रन्थाः विक्रीताः अभवन्। ४ लक्ष-जनाः मेलायाम् उपस्थिता अभवन्। मेलेयं संस्कृतज्ञेषु नूतनोत्साहं सञ्चारयितुं बहुभिः दृष्टिभिः उपकारकः अजायत।



उद्घाटनसत्रस्य किञ्चन दृश्यम्

## सम्पन्नं पूर्वोत्तरसंस्कृतसम्मेलनम्

नवदेहलीस्थ-राष्ट्रियसंस्कृतसंस्थानं शिलचरस्थ-असमविश्वविद्यालयः इत्यनयोः संयुक्ततत्त्वावधाने १२-१४ मार्च, २०११ इत्यवधौ असमविश्वविद्यालयस्थ-विपिनचन्द्रपालमिलनायतनप्रेक्षागृहे 'पूर्वोत्तरराज्यानां विशेषसन्दर्भे भारतीयसंस्कृतौ संस्कृतस्य अवदानम्' इति विषयमवलम्ब्य पूर्वोत्तरसंस्कृतसम्मेलनं समायोजितमभवत्। पूर्वोत्तरराज्येषु संस्कृतस्य प्रचाराय तत्रत्य विदुषां संस्कृताय योगदानदृष्ट्या च अस्य सम्मेलनस्य किञ्चिद् विशिष्टं स्थानं वर्तते। सम्मेलनस्यास्य उद्घाटनसत्रे विशिष्टातिथित्वेन सिक्किमसर्वकारस्य मानवसंसाधनविकासमन्त्रालयविभागस्य निदेशकः श्रीरुद्रप्रसादपौडियालः, मुख्यातिथित्वेन शिलचर्स्थ-असमविश्वविद्यालयस्य कुलपतिः आचार्यः तपोधीरभट्टाचार्यः, सारस्वतातिथित्वेन असमविश्वविद्यालयस्य कुलपतिचरः आचार्यः निरञ्जनरायः नवदेहलीस्थ-राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः आचार्यः राधावल्लभः त्रिपाठी च सभां व्यभूषयन्। अस्मिन्नेवावसरे असमविश्वविद्यालयस्य संस्कृतविभागेन केचन मनोहराः सांस्कृतिककार्यक्रमा अपि प्रस्तुताः। अत्र तावत् सरस्वतीवन्दनानृत्यं, मृच्छकटिकस्य कस्यचिदंशस्य संस्कृतनाट्याभिनयः, संस्कृतरवीन्द्रनृत्यं, संस्कृतवृन्दानृत्यम् इत्येते कार्यक्रमाः रङ्गे मञ्चिता अभवन्। असमविश्वविद्यालयस्य संस्कृतविभागाध्यक्षा आचार्या स्वप्नादेवी धामाइल्विधां बिहूविधां च अनूद्य संस्कृतेन किञ्चिदद्भुतं कार्यक्रमं प्रस्तूतवती।



सांस्कृतिककार्यक्रमस्य किञ्चन दृश्यम्





समापनसत्रस्य किञ्चन दृश्यम्

सम्मेलनेऽस्मिन् सत्रक्रमेण पूर्वोत्तरराज्यानां भाषाभिः सह संस्कृतस्य सम्बन्धः, पूर्वोत्तरराज्यानां भारतीयदर्शनेषु प्रभावः, संस्कृते मूल्यतन्त्रमथ च पूर्वोत्तरराज्यीयकाव्येषु भारतीयमहाकाव्यानां प्रभावः, पूर्वोत्तरराज्येषु भक्त्यान्दोलनम्, पूर्वोत्तरराज्यानां परिप्रेक्ष्ये भारतीयसंस्कृतेः संवर्द्धनम्, संस्कृतं पूर्वोत्तरभाषाश्च, पूर्वोत्तरराज्येषु भारतीयसंस्कृतेः विभिन्नविधानां प्रभावः चेति विषयेषु चर्चासत्राणि प्रवृत्तानि। विभिन्नैः विद्वद्भिः उपरिनिर्दिष्टांशेषु सुष्ठुरीत्या स्वाभिप्रायः प्रकटितः।

१४ मार्च, २०११ दिनाङ्के समापनसत्रे मुख्यातिथित्वेन कोलकातास्थ-संस्कृतसाहित्यपरिषदः मानार्हसचिवः जादवपुरविश्वविद्यालयस्य प्राप्तावकाशसंस्कृतविभागाध्यक्षश्च आचार्यः मानवेन्दुबनर्जी, सारस्वतातिथित्वेन असमविश्वविद्यालयस्य कुलसचिवः श्रीदेवव्रतदेवः, आचार्यनिरञ्जनरायश्च उपस्थिताः आसन्। अत्र असमविश्वविद्यालयस्य कुलपतिः आचार्यः तपोधीरभट्टाचार्यः आध्यक्ष्यं निरवहत्। कार्यक्रमस्यास्य संयोजनं असमविश्वविद्यालयस्य संस्कृतविभागाध्यक्षा आचार्या स्वप्नादेवी अकरोत्। मञ्चसञ्चालनं डा. रत्नमोहनझा कृतवान्।

## मुक्तस्वाध्यायपीठस्य सम्पर्ककक्षाः प्रवृत्ताः

राष्ट्रियसंस्कृतसंस्थानस्य मुक्तस्वाध्यायपीठस्य (दूरस्थशिक्षाप्रकल्पस्य) मार्चमासे निर्धारिताः १५ दिनानां परामर्शदाः सम्पर्ककक्षाः संस्थानमुख्यालये सर्वपरिसरेषु च प्रचलिताः। संस्थानमुख्यालये कैश्चित् कारणैः एताः कक्षाः ०७.०३.११-१३.०३.११ इत्यवधौ प्रचलिताः। अप्रैलमासि इतोऽपि एताः अवशिष्टाः कक्षाः प्रचलिष्यन्ति। संस्थानमुख्यालये डा. वाई.एस. रमेशः, डा. रत्नमोहनझा, श्री कू. वेङ्कटेशमूर्तिः, डा. अजयकुमारमिश्रः, श्रीप्रफुल्लगडपालः, डा. टी. महेन्द्रः इत्येते मुक्तस्वाध्यायपीठसदस्याः श्रीला.ब.शा.रा.सं.वि.पीठस्य आचार्यरमेशकुमार-पाण्डेयश्च सम्पर्ककक्षाः समचालयन्।



सम्पर्ककक्षयोः दृश्ये

## ४८तमा अखिलभारतीया शास्त्रीया स्पर्धा सम्पन्ना



कार्यक्रमस्य उद्घाटनं कुर्वन् आचार्यः राधावल्लभत्रिपाठी पार्श्वे दृश्यन्ते श्रीश्रीविश्वेशतीर्थस्वामिचरणाः

०६.०१.२०११ तः ०८.०१.२०११ दिनाङ्कं यावत् बेङ्गलूरुनगरे पूर्णप्रज्ञविद्यापीठे ४८तमा अखिलभारतीयशास्त्रीयस्पर्धा सम्पन्ना। विभिन्नेषु राज्येषु आयोजितासु राज्यस्तरीयशास्त्रीयस्पर्धासु चिताः २०९ छात्राः राष्ट्रस्तरीयासु स्पर्धासु भागमगृह्णन्। उडुपिस्थ-पेजावरमठाधीशानां श्रीश्रीविश्वेशतीर्थस्वामिपादानां दिव्योपस्थितौ प्रवृत्ते उद्घाटनसमारोहे मुख्यातिथिरूपेण अन्ताराष्ट्रियसंस्कृतविद्यासमवायस्य अध्यक्षचरः आचार्यः रामकरणशर्मा, अध्यक्षरूपेण संस्थानकुलपतिः आचार्यः राधावल्लभत्रिपाठी च समुपस्थितौ आस्ताम्। पूर्णप्रज्ञसंशोधनमन्दिरस्य अध्यक्षः आचार्यः प्रह्लादाचार्यः, पूर्णप्रज्ञविद्यापीठस्य प्राचार्यः विद्वान् हरिदासभट्टः, संस्थानकुलसचिवः आचार्यः रामानुजदेवनाथः, पूर्णप्रज्ञसंशोधनमन्दिरस्य निदेशकः डा. नागसम्पिगे च वेदिकामलमकुर्वन्। पूर्णप्रज्ञविद्यापीठस्य शृङ्गेरीपरिसरस्य च छात्राः वेदघोषमकुर्वन्। कुमारी अनद्या आरम्भे प्रार्थनामकरोत्। संस्थानकुलसचिवः स्वागतवचांसि न्यवेदयत्। कुलपतिः स्वभाषणे कार्यक्रमस्वरूपं विवृण्वन् 'यूनां शास्त्रविषयिणीं प्रतिभां पुरस्कर्तुं शास्त्रीयभाषण-शलाकापरीक्षादिस्पर्धाः आयोज्यन्ते, राष्ट्रस्तरीयस्पर्धायै अर्हणां चयनाय पूर्ववर्षतः राज्यस्तरीयस्पर्धाः अपि विभिन्नराज्येषु संस्थानेनायोज्यन्ते' इति अवादीत्। कार्यक्रमस्य समुद्घाटनभाषणं कुर्वता आचार्येण रामकरणशर्ममहोदयेन अखिलभारतीयसंस्कृतवाक्स्पर्धानां/ शास्त्रीयस्पर्धानाम् आयोजनस्य आरम्भप्रयासमधिकृत्य, तदुद्देश्यमधिकृत्य साम्प्रतिकप्रगतिविषये च श्रोतृवर्गः समुद्बोधितः। श्रीश्रीविश्वेशतीर्थस्वामिपादाः 'राष्ट्रियभावैक्य-साधने संस्कृतभाषा साधनभूता भवती'ति सोदाहरणं न्यरूपयन्। 'सिद्धान्तदृष्ट्या परस्परं विरुद्धदर्शनानि अधीयानाः अपि संस्कृतदृष्ट्या एककुटुम्बसदस्याः इव व्यवहरन्ति, व्यवहरेयु'श्चेति उपादिशन्। पूर्णप्रज्ञसंशोधनमन्दिरस्य निदेशकः डा. नागसम्पिगे व्यवस्थासम्बद्धनिर्देशान् प्रदाय धन्यवादार्पणमकरोत्। वेङ्कटेशमूर्तिना उद्घाटनसभासञ्चालनमकारि। उद्घाटन-सत्रानन्तरं त्रिषु स्थानेषु डा. वाई. एस. रमेश-डा. रत्नमोहनझा-वेङ्कटेशमूर्ति-डा. महेन्द्राः समकालमेव विभिन्नाः स्पर्धाः समचालयन्। तत्र प्रथमे दिने ०६.०१.२०११ दिनाङ्के तिस्रः कण्ठपाठस्पर्धाः, षट्सु शास्त्रेषु शलाकापरीक्षाः च अभवन्। कार्यक्रमस्य द्वितीये दिने अष्टसु विषयेषु भाषणस्पर्धाः समस्यापूर्तिश्च समजायन्त। अन्तिमे दिने पूर्वाह्णे ९.०० वादनतः मध्याह्ने १२.०० वादनं यावत् प्रवृत्तायाम् अन्त्याक्षर्यां ४३ (त्रिचत्वारिंशत्) भागग्राहिणः स्वीयं पाटवं प्रादर्शयन्। अपराह्णे सम्पन्ने पुरस्कारप्रदानोत्सवे मुख्यातिथिरूपेण समागता जर्मन्देशस्य हमबोल्ट्विश्वविद्यालयस्य विदुषी डा. एनेट् स्वेमिड्चेन् भारतीयसंस्कृतौ संस्कृतविद्यायां च स्वीयमनुरागं प्रकटय्य भाषणमकरोत्। सारस्वतातिथिरूपेण समुपस्थितौ आचार्यौ रामकरणशर्म-प्रह्लादाचार्यौ भागग्रहीतॄन् स्पर्धालून् अभिनन्द्य शास्त्राध्ययनपरम्परा उत्तरोत्तरमभिवर्धतामिति शुभाशयान् प्राकटयताम्। कुलपतिः राधावल्लभत्रिपाठी 'अग्रिमपर्याये अस्मिन् कार्यक्रमे शोधच्छात्राणां कृतेऽपि 'शास्त्रार्थविचारस्पर्धा' आयोजयिष्यते' इति नूतनस्पर्धाम् उद्घोषयत्। विभिन्नासु स्पर्धासु विजयिभ्यः विशिष्टातिथयः स्वर्णपदक-प्रमाणपत्रादिपुरस्कारान् प्रायच्छन्।




कार्यक्रमे मञ्चस्थाः विद्वांसः



जेतृभ्यः पुरस्कारान् प्रयच्छन् कुलपतिः राधावल्लभत्रिपाठी

सर्वासु स्पर्धासु अत्यधिकानङ्कान् प्राप्तवते कर्णाटकराज्यस्य स्पर्धालुगणाय विजयवैजयन्ती प्रदत्ता। अवसरेऽस्मिन् संस्कृतवार्तायाः दशमाङ्कस्य लोकार्पणमभूत्। विश्वसंस्कृतपुस्तकमेलावसरे संस्थानपक्षतः ग्रन्थं सम्पाद्य प्रदत्तवतां विदुषां, शास्त्रीयस्पर्धाकार्यक्रमे निर्णायकत्वेन समागतविदुषां च सम्माननं कुलपतिवर्येण कृतम्। कार्यक्रमे समुपस्थिताः श्रीश्रीविश्वेशतीर्थश्रीचरणाः पुरस्कृतेभ्यः छात्रेभ्यः आशिषः प्रायच्छन्। 'गभीरं शास्त्राध्ययनं कृत्वा, शास्त्रचर्चादिकं च प्रवर्त्य ज्ञेयं तत्त्वमाविष्करणीय'मिति ते सर्वानुदबोधयन्। सम्पूर्तिसभायामस्यां कुलसचिवः आचार्यः रामानुजदेवनाथः स्वागतभाषणम् अकार्षीत्, पूर्णप्रज्ञसंशोधनमन्दिरनिदेशकः डा. नागसम्पिगे धन्यवादं च आविरकरोत्। मुक्तस्वाध्यायपीठस्य निदेशकः डा. वाई. एस्. रमेशः अवसरेऽस्मिन् सभां समचालयत्।

## अखिलभारतीयशास्त्रीयस्पर्धासु विजयिनः


( प्रथम-द्वितीय-तृतीयक्रमेण )

| विषयः | विजयिनां नामानि | संस्था |
|---|---|---|
| व्याकरणे | मनीषझाः | श्रीला.बा.शा.रा.सं.वि.पी., नवदेहली |
| | रवीन्द्रकुमारः | श्री.दया.आ.ज्यो.गुरु., पौन्धा, देहरादूनम् |
| | नागेन्द्रपवनः | श्रीचा.रा.सं.म.पा., बेङ्गलूरु |
| साहित्ये | भानुप्रतापशर्मा | रा.सं.सं. श्रृङ्गेरीपरिसरः |
| | प्रियङ्कागर्ग | रा.सं.सं., जयपुरपरिसरः |
| | विश्वजितदाशः | रा.सं.वि.पी., तिरुपतिः |
| न्याये | सन्दीपकानेटकरः | रा.सं.सं., श्रृङ्गेरीपरिसरः |
| | पीताम्बरनिराला | प.बं.रा.वि.वि. |
| | जोषी विजया एन. | दर्शनम्-सं. महावि., छारोडी |
| सांख्ययोगे | कृष्णानन्द बी. एम. | श्री.म.प्र.सं.पा.शा., उडुपि |
| | त्रिवेदी दिगन्तः | ब्र.सं.महावि., नडियाद |
| | अजयकुमारपाण्डेयः | रा.सं.सं., पुरीपरिसरः |
| मीमांसायां | श्रीकृष्णभट्टः | श्रीमहा.सं.म.पा.शा., मैसूरु |
| | साधुः मुनिवत्सलदासः | दर्शनम्-सं. महावि., छारोडी |
| | कृष्णमूर्तिः एस. | सं. महावि., मैलापुरम् |
| वेदान्ते | विवेककर्मकारः | रा.कृ.मि.वि.वि.वि., कोलकाता |
| | राधाकान्तपण्डा | रा.सं.वि.पी., तिरुपतिः |
| | सूर्यनारायणमिश्रः | रा.सं.सं., पुरीपरिसरः |
| धर्मशास्त्रे | विघ्नेश्वरभट्टः | श्रीमहा.सं.म.पा.शा., मैसूरु |
| | अनुप्रिया | रा.सं.सं., जयपुरपरिसरः |
| | जोशी धरम एम. | दर्शनम्-सं.महावि., छारोडी |
| ज्यौतिषे | मुकेशकुमारः | रा.सं.सं., श्रृङ्गेरीपरिसरः |
| | अमितशुक्लः | रा.सं.सं., भोपालपरिसरः |
| | अन्नपूर्णेश्वरी वी.एस. | रा.सं.वि.पी., तिरुपतिः |

## शलाकापरीक्षासु पुरस्कारभाजः

| विषयः | नाम | संस्था |
|---|---|---|
| काव्ये | वादिराजजमुखण्डी | पू.प्र.वि.पी., बेङ्गलूरु |
| | सत्यकाम आर्यः | गु.कु., गरली |
| | विकासपाण्डेयः | श्री.भा.आ.सं.महावि., चुनार, मिर्जापुरम् |
| साहित्ये | जयेशव्यासः | रा.सं.सं., जयपुरपरिसरः |
| न्याये | प्रसन्नः के. वी. एन. | पू.प्र.वि.पी., बेङ्गलूरु |
| | आशुतोष-आनन्दः | सम्पू.सं.वि.वि., वाराणसी |
| सि. ज्यौतिषे | विजयानन्दः अडिगः | श्री.म.सि.प्र.सं.म.पा., उडुपि |
| | विनोदकुमारशर्मा | रा.सं.सं., जयपुरपरिसरः |
| | अनिरूद्धनारायणशुक्लः | सम्पू.सं.वि.वि., वाराणसी |
| वेदान्ते | भीमसेनगुत्तलः | पू.प्र.वि.पी., बेङ्गलूरु |
| | गुहकृष्णः पी. वी. | मद्र.सं.महावि., मैलापुरम् |
| व्याकरणे | अर्चनाकारन्त | रा.सं.सं., श्रृङ्गेरीपरिसरः |
| | राहुलशर्मा | रा.सं.सं., भोपालपरिसरः |
| | आशीषवशिष्ठः | रा.सं.सं., जयपुरपरिसरः |
| पुराणेतिहासे | हार्दिकराज्यगुरुः | रा.सं.सं., जयपुरपरिसरः |
| | हरिहरः सी. | मद्र.सं. महावि., मैलापुरम् |
| | आदेशकुमारमिश्रः | रा.सं.सं., लखनऊपरिसरः |
| अष्टाध्याय्यां | पुरुषोत्तमदासः | रा.सं.सं., जम्मूपरिसरः |
| | अमरनाथशर्मा | रा.सं.सं., श्रृङ्गेरीपरिसरः |
| | विपिनकुमारः | रा.सं.सं., मुम्बईपरिसरः |
| अमरकोषे | शिवप्रसादभट्टः जी. | श्री.म.वे.प्र.सं.म.पा.शा., उडुपि |
| | योगेशपाण्डेयः | रा.सं.सं., लखनऊपरिसरः |
| | रञ्जिनी | रा.सं.सं., गुरुवायूर्परिसरः |
| समस्यापूर्तौ | सन्दीपकुमारपाठकः | श्री.भागी.ट्र.आ.सं.महावि., मिर्जापुरम् |
| | श्रीकृष्णभट्टः | महा.सं.म.पा., मैसूरु |
| | राजेश्वररावः | रा.सं.वि.पी., तिरुपतिः |
| अन्त्याक्षर्यां | वीरेन्द्रकुमारतिवारी | श्री.भागी.ट्र.आ.सं.महावि., मिर्जापुरम् |
| | अलकाकुमारी | रा.सं.सं., गरलीपरिसरः |
| | श्रीकृष्णभट्टः | महा.सं.म.पा., मैसूरु |

अभिवर्धन्ताम्



कार्यक्रमस्य कानिचन दृश्यानि

## ४९तमायाः अखिलभारतीयशास्त्रीयस्पर्धायाः विषयाः

४९तमा अखिलभारतीयशास्त्रीयभाषणस्पर्धाः शलाकापरीक्षाः च २०१२ तमे वर्षे गुजरातराज्यस्य छारोडीस्थ–'दर्शनम्'संस्कृत–महाविद्यालये भविष्यन्ति। विविधशास्त्रीयस्पर्धानां निमित्तम् अधोनिर्दिष्टरीत्या विषयाः निर्दिष्टाः–

**शलाकापरीक्षाविषयाः –**

साहित्ये **ध्वन्यालोके १–४ उद्योताः**, व्याकरणे **महाभाष्ये द्वितीयमाह्निकम्**, न्याये **न्यायसिद्धान्तमुक्तावल्यां शब्दखण्डः**, सिद्धान्तज्यौतिषे **सिद्धान्तशिरोमणेः आदितः त्रिप्रश्नाधिकारपर्यन्तम्**, वेदान्ते **विवेकचूडामणिः**, पुराणेतिहासे **श्रीमद्भागवते १०–११ स्कन्धौ**, मीमांसायां **मीमांसापरिभाषा (सम्पूर्णा)**

**कण्ठपाठस्पर्धाविषयाः –**

काव्यकण्ठपाठे **कुमारसम्भवे १–५ सर्गाः**, अमरकोष–कण्ठपाठे **सम्पूर्णः अमरकोषः**, अष्टाध्यायीकण्ठपाठे **सम्पूर्णा अष्टाध्यायी**, धातुरूपकण्ठपाठे **कपिलदेवद्विवेदिप्रणीत–प्रौढरचनानुवादकौमुद्यां प्रदर्शितानि १०० धातूनां दशसु लकारेषु सर्वाणि रूपाणि।**

**अन्त्याक्षरीविषयाः –**

अन्त्याक्षर्यां **रघुवंश – कुमारसम्भव – किरातार्जुनीय–नैषधीयचरित–शिशुपालवध–बुद्धचरित–सौन्दरनन्द–मेघदूत–अभिज्ञानशाकुन्तल – उत्तररामचरित – स्वप्नवासवदत्त–विक्रमोर्वशीय – मुद्राराक्षस – मृच्छकटिक – मालविकाग्नि–मित्राणीत्येतेभ्यः** एव ग्रन्थेभ्यः सर्वे श्लोकाः स्वीकर्तुं शक्यन्ते। स्पर्धासम्बद्धाः नियमाः संस्थानेन प्रकाशितनियमावल्यां संस्थानस्य जालपुटे www.sanskrit.nic.in इत्यत्र अपि द्रष्टुं शक्यन्ते।



लब्ध–विजयवैजयन्ती–गणः



कार्यक्रमम् अवलोकयन्तः प्रेक्षकाः

## 'आधुनिकसंस्कृतसाहित्ये युगबोधः' इत्यस्मिन् विषये सङ्गोष्ठी समायोजिता

नवदेहलीस्थ–राष्ट्रियसंस्कृतसंस्थानं, वाराणसीस्थ–महात्म–गान्धि–काशी–विद्यापीठम् इत्यनयोः संयुक्ततत्त्वावधाने महात्म–गान्धि–काशीविद्यापीठस्य संस्कृतविभागे 'आधुनिकसंस्कृतसाहित्ये युगबोधः' इति विषयिणी काचित् राष्ट्रिया सङ्गोष्ठी सुसम्पन्नतां गता। २३.०२.२०११ तः २५.०२.२०११ पर्यन्तं प्रचलितेयं दिनत्रयात्मिका सङ्गोष्ठी बहुभिः प्रकारैः वैशिष्ट्ययुतासीत्।

सङ्गोष्ठ्या उद्घाटनं महात्मगान्धिकाशीविद्यापीठस्य कुलपतिः आचार्यः अवधरामः अकरोत्। स्वीयोद्घाटनभाषणे सः संस्कृतभाषायाः तत्साहित्यस्य च माहात्म्यं प्राकटयत्। वाराणसीस्थ–इन्दिरागान्धि–राष्ट्रियकलाकेन्द्रस्य परामर्शदाता विख्यात–संस्कृतविद्वान् च आचार्यः कमलेशदत्तत्रिपाठी 'संस्कृतसाहित्यस्य युगीनो बोधः यथाकालम् साहित्यकारैः साहित्ये आनुकूल्येन प्रतिष्ठापनीयः' इति दृढं प्रत्यपादयत्। सः आचार्यहजारीप्रसादद्विवेदिनः विचारानपि स्ववक्तव्ये प्राकटयत्। आचार्यप्रभुनाथद्विवेदिना अत्र पाठ्यक्रमे आधुनिकसंस्कृतसाहित्याभावस्य चर्चा कृता। आचार्यराजेन्द्रमिश्रः 'प्राच्यशब्दभण्डारस्य संरक्षणं' प्रति सर्वेषां ध्यानाकर्षणमकरोत्।

सङ्गोष्ठ्यामस्याम् आचार्यः उमाशङ्करशर्मा (ऋषिः), आचार्यरहसबिहारी द्विवेदी, आचार्यः मिथिलाप्रसादत्रिपाठी, डा. बनमाली–बिश्वालः, डा. जनार्दनपाण्डेयः, डा. महाराजदीनपाण्डेयः, आचार्य–हरेरामत्रिपाठी, आचार्या उमाराणीत्रिपाठी, आचार्यश्रीनिवास–ओझा–डा. अजयकुमारमिश्रः इत्यादयो विद्वांसः स्वीयान् विचारान् प्राकटयन्।

अस्यां सङ्गोष्ठ्यां विविधविषयेषु विविधसाहित्यरचनासु च गभीरो विमर्शः सञ्जातः। सांस्कृतिकसन्ध्या–नाम्ना विहितकार्यक्रमे छात्रैः महिषासुरमर्दिनी इति नाट्यप्रदर्शनमपि सङ्गोष्ठ्यङ्गतया आयोजितम्।

## सम्पन्ना राष्ट्रिया संस्कृतसङ्गोष्ठी

राष्ट्रियसंस्कृतसंस्थानेन १४-१६ फरवरी, २०११ इत्यवधौ दिनत्रयव्यापिनी राष्ट्रिया संस्कृतसङ्गोष्ठी गुवाहाटीस्थ-के.के.एच. संस्कृतमहाविद्यालये समायोजिता। 'पुराणेतिहासः भारतवर्षञ्चे'ति विषयमाधृत्येयं सङ्गोष्ठी प्रवृत्ता।

उद्घाटनसत्रे आचार्यः गौतमभाई-पटेलः मुख्यातिथित्वेन बीजभाषणं कुर्वन् वैदिकवाङ्मयमुद्धृत्य सन्दर्भेऽस्मिन् विविध-साहित्यप्रसङ्गान् प्रख्यापयत्। विशिष्टातिथित्वेन डा. रमाकान्त-शुक्लः "वैदिकवाङ्मये वृत्तिः" इति विषयमाधृत्य अभाषत। दिल्लीसंस्कृताकादम्याः उपाध्यक्षः डा. श्रीकृष्णसेमवालः संस्कृतस्य महत्त्वमुद्दिश्य स्वाभिप्रायं प्राकटयत्।

सङ्गोष्ठ्याः द्वितीये दिने डा. बलदेवानन्दसागर-डा. श्रीकृष्ण-सेमवाल-डा. जीतरामभट्ट-डा. गोकुलानन्दनारायणदेवगोस्वामि-प्रभृतयः कवयः काव्यपाठमकुर्वन्। सुकविः डा. रमाकान्तशुक्लः 'भारतजनताहम्' इति स्वोपज्ञं काव्यं संश्राव्य आधुनिकपरिदृश्यं सुष्ठु उपस्थापयत्।

तृतीये दिने सम्पन्ने समापनकार्यक्रमे मुख्यातिथित्वेन समागतः सर्वोच्चन्यायालयस्य मान्यन्यायाधीशः संस्कृतानुरागी च न्यायमूर्तिः मुकुन्दरामशर्मा संस्कृतशास्त्रेषु सन्निहितज्ञानभण्डारविषये चर्चामकरोत्। गुवाहाटी-विश्वविद्यालयस्य संस्कृतविभागे कार्यरतः आचार्यः उमाकान्तदेवशर्मा सङ्गोष्ठ्याः माहात्म्यं व्यावृणोत्। इयं सङ्गोष्ठी अत्यन्तं सफलतया सम्पन्नाऽभवत्।

## सञ्जातः तृतीयदीक्षाभिमुखीकरणकार्यक्रमः

राष्ट्रियसंस्कृतसंस्थानेन संस्कृतशिक्षणं सर्वलोकसुलभं विधातुं दीक्षाक्रमेण अनौपचारिकसंस्कृतशिक्षणकेन्द्रमाध्यमेन संस्कृतशिक्षण-कार्यक्रमः बहुपूर्वं समारब्धः। अयं पाठ्यक्रमः अत्यन्तं लोकप्रियतां गतः। सम्पूर्णराष्ट्रे प्रथमदीक्षा द्वितीयदीक्षां च अनौपचारिक-संस्कृतशिक्षाकेन्द्रेषु पाठ्यते। अस्मिन्नेव क्रमे तृतीयदीक्षान्तर्गतानां ग्रन्थानां शिक्षणार्थं राष्ट्रिय-संस्कृतसंस्थानेन तृतीयदीक्षाभि-मुखीकरणकार्यक्रमः २३.०३.११ तः २५.०३.११ पर्यन्तं नवदेहलीस्थ-छत्तरपुरक्षेत्रे श्री-आद्य-कात्यायनीशक्तिपीठे समायोजितः। अस्मिन् कार्यक्रमे राष्ट्रस्य विविधराज्येषु आहत्य १२९ शिक्षकाः सम्मिलिता अभवन्।



कार्यक्रमे भाषमाणः डा.वाई.एस. रमेशः मञ्चे विशिष्टाश्च

अस्य कार्यक्रमस्य उद्घाटनसत्रे मुख्यातिथित्वेन आचार्यः रमाकान्तशुक्लः अध्यक्षत्वेन च राष्ट्रियसंस्कृतसंस्थानस्य कुलसचिवः आचार्यः रामानुजदेवनाथन् उपस्थितौ आस्ताम्। आचार्यः रमाकान्तशुक्लः संक्षेपरामायणमुद्दिश्य स्वाभिप्रायं प्राकटयत्।

कार्यक्रमस्य समापनसत्रे तावत् मुख्यातिथित्वेन श्रीला.ब. शा.रा.सं.वि.पीठस्य आचार्यः इच्छारामद्विवेदी सभां व्यभूषयत्। अस्मिन् उन्मुखीकरणकार्यक्रमे आचार्यः रामानुजदेवनाथः, डा.वाई.एस.रमेशः (प्रशिक्षणप्रमुखः), श्रीसुधीष्ठकुमारमिश्रः, डा. रत्नमोहनझा च शिक्षकत्वेन प्रबोधयन्।


कार्यक्रमे भागगृहीणां किञ्चन दृश्यम्

## पूर्णप्रज्ञसंशोधनमन्दिरे सम्पन्नाः विशिष्टकार्यक्रमाः

राष्ट्रियसंस्कृतसंस्थानस्य बेङ्गलूरुस्थ-आदर्शशोधसंस्थाने पूर्णप्रज्ञसंशोधनमन्दिरे केचन विशिष्टाः कार्यक्रमाः समायोजिताः अभवन्। तत्र १९-२० मार्च, २०११ दिनाङ्कयोः 'न्यायामृत-अद्वैतसिद्धिकार्यशाला', २६-२७ मार्च, २०११ दिनाङ्कयोः 'अग्निमहापुराणविषयकराष्ट्रियसम्मेलनं', २४-३१ मार्च, २०११ दिनाङ्केषु च 'एच.एच. श्रीविश्वेशतीर्थस्वामिनः रचनात्मकं साहित्यम्' आधारीकृत्य कार्यक्रमाः सञ्जाताः। अत्र तावत् दृग्दृश्यसम्बन्धानुपपत्तिभङ्गविषये १९-२० मार्च, २०११ दिनाङ्कयोः न्यायामृतरीत्या आचार्यौ ए. हरिदासभट्ट-डी.प्रह्लादाचार्यौ अद्वैतसिद्धिरीत्या आचार्यः मणिद्राविडशास्त्री च भाषितवन्तः। अवसरेऽस्मिन् तरङ्गिनी-ब्रह्मानन्दीय-कण्टकोद्धारादिग्रन्थस्य विषयविमर्शनार्थं देशस्य बहवो विद्वासः समागता आसन्। १९.०३.२०११ दिनाङ्के उडुपिस्थ-श्रीपेजावरमठस्य एच. एच. श्रीविश्वेशतीर्थस्वामिनः करकमलाभ्यां नैके ग्रन्थाः लोकार्पिताः अभवन्।

२६.०३.२०११ दिनाङ्के अग्निमहापुराणसम्बद्धराष्ट्रियसम्मेलने आचार्य डी.प्रह्लादाचार्य-आचार्यरामानुजदेवनाथ-डा.ए.वी. नागसम्पिगे-प्रभृतीनां विशिष्टानाम् उपस्थितौ एच. एच. श्रीविश्वेशतीर्थस्वामिपादः कार्यक्रमस्य आध्यक्ष्यं निरवहत्। प्रथमाधिवेशने कूर्मावतार-रामावतारवर्णनं, राजधर्माः, ज्योतिषशास्त्रम् इत्येतेषु विषयेषु चर्चासत्राणि प्रवृत्तानि। द्वितीयाधिवेशने प्रायश्चित्तविधिः, देवालयनिर्माणं देवताप्रतिष्ठाविधिश्च, काव्यनाटकनिरूपणम् इत्येतेषु विषयेषु चर्चा अभवत्। तृतीयाधिवेशनं व्याकरणनियमाः, अष्टाङ्गयोगः, सर्वतोभद्रमण्डलं चक्राब्जमण्डलं च, दानपरिभाषा इत्येतेषु विषयेषु आधारितमासीत्। २४-३१ मार्च, २०११ दिनाङ्केषु क्रमशः दिनाङ्कक्रमेण भागवतसंग्रहः, दशप्रकरणानि (उपोद्घातः), श्रीमन्न्यायसुधासारः, तत्त्वविनिर्णयसारः, दशोपनिषद्भाष्यसारः, तत्त्वाञ्जलिः, न्यायामृतनवनीतं, रामायणसंग्रहः, गीतासारोद्धारः चेत्येतेषु विषयेषु सङ्गोष्ठीकार्यक्रमाः प्रचलिताः। पूर्णप्रज्ञसंशोधनमन्दिरस्य निदेशकः डा. ए. वी. नागसम्पिगे कार्यक्रमस्यास्य संयोजनमकरोत्।



# कुलपतेः दैनन्दिनी

०२.०१.११ मन्दाकिनी-विद्वत्परिषत्कार्यक्रमे उपस्थितिः।

०३.०१.११ संस्थानस्य वित्तविभागाधिकारिभिः समं वित्तनिरीक्षणसम्बद्धोपवेशने आध्यक्ष्यम्।

०४.०१.११ १५तमस्य विश्वसंस्कृतसम्मेलनस्य प्रदर्शिनीसम्बद्धोपवेशने आध्यक्ष्यम्।

०६.०१.११ बेङ्गलूरुस्थ-पूर्णप्रज्ञसंशोधनमन्दिरे समायोजिते अखिलभारतीयशास्त्रीयस्पर्धायाः उद्घाटनकार्यक्रमे आध्यक्ष्यम्।

०७.०१.११ बेङ्गलूरुनगरे समायोजिते विश्वसंस्कृतपुस्तकमेलके उपस्थितिः, ग्रन्थलोकार्पणकार्यक्रमस्य आध्यक्ष्यं च।

१६.०१.११ बेङ्गलूरुस्थ-पूर्णप्रज्ञसंशोधनमन्दिरे समायोजिते अखिलभारतीयशास्त्रीयस्पर्धाकार्यक्रमस्य पुरस्कारप्रदानसमारोहे आध्यक्ष्यम्।

१४.०१.११ भोपालस्थ-बरकत-उल्लाविश्वविद्यालये शोधोपाधिसमित्युपवेशने उपस्थितिः।

१६.०१.११ गुडगाँवस्थ-शीतलामन्दिरे वैदिकविद्यालयस्य उद्घाटनसमारोहे मुख्यातिथित्वेन समागतेन हरियाणाप्रदेशस्य मुख्यमन्त्रिणा श्रीभूपेन्द्रसिंहहुड्डावर्येण सह कार्यक्रमस्य आध्यक्ष्यम्।

१८.०१.११ शृङ्गेरीपरिसरे राजीवगान्धि-अन्ताराष्ट्रियव्याख्यानकार्यक्रमे अध्यक्षीयोद्बोधनम्।

१९.०१.११ मानवसंसाधनविकासमन्त्रिणः आध्यक्ष्ये सङ्कटग्रस्तानां भाषाणां संरक्षणसम्बद्धोपवेशने उपस्थितिः।

२०.०१.११ श्रीराहुलगान्धिना सह उपवेशनम्।

२१.०१.११ नवदेहलीस्थ-श्री.ला.ब.शा.रा.सं.विद्यापीठे संयुक्तसचिवायाः (भाषायाः) आध्यक्ष्ये सम्पन्ने संस्कृतोन्नयनसम्बद्धोपवेशने उपस्थितिः। नवदेहलीस्थ-डिफेंस-कालोनी आई.आई.ए.एस. इत्यत्र अभिनवगुप्ताध्ययनसप्ताहसम्बद्धायोजनसमितेः उपवेशने उपस्थितिः।

२७.०१.११ वित्तसमितेः प्रबन्धमण्डलस्य च उपवेशने आध्यक्ष्यम्।

३१.०१.११ मुक्तस्वाध्यायपीठस्य कार्यक्रमाणां पुनरीक्षणम्। श्रीमत्याः कुन्तीज्ञानचन्दानीमहोदयायाः सेवानिवृत्तिकार्यक्रमे आध्यक्ष्यम्।

०२.०२.११ संस्थानमुख्यालये ई-शासनोन्नयनसम्बद्धोपवेशने उपस्थितिः।

०३.०२.११ नवदेहल्यां टैगोरगार्डन् इत्यत्र केन्द्रीयविद्यालयस्य प्रबन्धसमितेः उपवेशने आध्यक्ष्यम्।

०४.०२.११ आचार्यनागास्वामिना सह विश्वसंस्कृतसम्मेलनसम्बद्धोपवेशने उपस्थितिः।

०५.०२.११ संस्थानमुख्यालये कनिष्ठशोधाध्येतृचयनसमितेः आध्यक्ष्यम्।

०६.०२.११ पटनास्थ-संस्कृतविकासपरिषदा आयोजितसम्मेलनस्य उद्घाटनसमारोहे आध्यक्ष्यम्।

०७.०२.११ नवदेहलीस्थ-राष्ट्रियपाण्डुलिपिमिशन्-द्वारा इण्डो-आर्यन्-भाषाणां पाण्डुलिपिप्रकाशनस्य पुनरीक्षणोपवेशने उपस्थितिः।

०९.०२.११ सर्वश्रेष्ठसंस्कृतग्रन्थपुरस्कारस्य नियमनिर्मितिः। वेदविद्याप्रतिष्ठानस्य वित्तसमितेः उपसमित्युपवेशने उपस्थितिः।

१५.०२.११ नवदेहलीस्थ-इन्दिरागान्धिराष्ट्रियकलाकेन्द्रेण समायोजिते कार्यक्रमे महाभारतीयकाव्यशास्त्रविषये व्याख्यानम्। श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृत-विद्यापीठस्य सामान्यकार्यपरिषदः उपवेशने उपस्थितिः।

१७.०२.११ श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठे अनुसन्धानकार्यशालायां व्याख्यानम्।

१८.०२.११ हरिद्वारस्थ-उत्तराखण्डसंस्कृतविश्वविद्यालयस्य कार्यपरिषदः उपवेशने उपस्थितिः।

१९.०२.११ उज्जयिनीस्थ-महर्षिपाणिनिसंस्कृतविश्वविद्यालयस्य चयनसमितेः उपवेशने उपस्थितिः।

२३.०२.११ राष्ट्रियसंस्कृतसंस्थानस्य शैक्षिकपरिषदः उपवेशने आध्यक्ष्यम्। संस्थाने विद्यावारिधिशोधोपाधौ वैशिष्ट्यवर्द्धनार्थं समायोजितकार्यशालायाः आध्यक्ष्यम्।

२६.०२.११ गरलीपरिसरस्य वार्षिकोत्सवकार्यक्रमे उपस्थितिः।

२७.०२.११ हिमाचलप्रदेशस्थ-डोहगी (ऊना) इत्यत्र सनातनधर्म-आदर्शसंस्कृतमहाविद्यालयस्य ८३तमे वार्षिकोत्सवे पुरस्कारवितरणकार्यक्रमे च मुख्यातिथित्वम्।

२८.०२.११ श्रीमतः आई.के. गुप्तस्य सेवानिवृत्तिकार्यक्रमे आध्यक्ष्यम्।

०३.०३.११ संस्थानमुख्यालये सहायकग्रन्थालयाध्यक्षपदस्य चयनसमित्युपवेशने आध्यक्ष्यम्।

०४.०३.११ राजनीतिविज्ञानविषयस्य सहायकप्राध्यापकपदस्य चयनसमित्युपवेशने आध्यक्ष्यम्।

०५.०३.११ जयपुरस्थ-जगद्गुरुरामानन्दाचार्यसंस्कृतविश्वविद्यालयेन समायोजिते सम्मेलने आध्यक्ष्यम्।

०६.०३.११ जयपुरपरिसरेणायोजिते सांस्कृतिकसन्ध्याकार्यक्रमे आध्यक्ष्यम्।

०७.०३.११ नवदेहलीस्थ-रवीन्द्रभवने वत्सलान्यासेन आयोजिते हीरानन्दशास्त्रिस्मृतिव्याख्यानमालाकार्यक्रमे प्रभाषणम्।

०८.०३.११ वाराणस्याम् इन्दिरागान्धिराष्ट्रियकलाकेन्द्रेण समायोजितायां नाट्यशास्त्रविषयिण्याम् अन्ताराष्ट्रियसङ्गोष्ठ्यां मुख्यभाषणम्।

०९.०३.११ नवदेहलीस्थश्रीला.ब.शा.रा.सं.विद्यापीठे संस्कृतसाहित्यविषयकराष्ट्रियसम्मेलने उद्घाटनभाषणम्। नवदेहलीस्थरवीन्द्रभवने अज्ञेयशताब्दीसमारोहे भाषणम्।

१०.०३.११ संस्थानमुख्यालये पाण्डुलिपिपण्डितपदस्य चयनसमितेः उपवेशने आध्यक्ष्यम्।

१२.०३.११ शिलचरस्थ-असमविश्वविद्यालयस्य संस्कृतविभागे समायोजितस्य पूर्वोत्तरसंस्कृतसम्मेलनस्य उद्घाटनकार्यक्रमे आध्यक्ष्यम्।

१६-१७.०३.११ लखनऊपरिसरस्य वार्षिकोत्सवे आध्यक्ष्यम्। लखनऊस्थ-प्रतिभासांस्कृतिकप्रतिष्ठानेन समायोजिते सम्मेलने उद्घाटनभाषणम्।

२२.०३.११ जम्मूपरिसरे परिसर-प्रेक्षागृहस्योद्घाटनम्। जम्मूपरिसरस्य वार्षिकोत्सवे आध्यक्ष्यम्।

२३-२७.०३.११ शिमलानगरे भारतीयोच्चाध्ययनसंस्थानेन समायोजिते अभिनवगुप्ताध्ययनसप्ताहे संयोजकत्वम्।

२९.०३.११ नवदेहलीस्थ-श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठस्य वित्तसमितेः कार्यपरिषदश्च उपवेशने उपस्थितिः।

३१.०३.११ संस्थानमुख्यालये कार्यरतयोः श्रीमतः रमेशचन्द्रहोता-महोदयस्य श्रीमत्याः भारतमल्होत्रा-वर्यायाश्च सेवानिवृत्तिकार्यक्रमे आध्यक्ष्यम्।

## संस्थानविदुषां क्रियाकलापाः/ उपलब्धयः

**डा. कृष्णानन्तपद्मनाभः** – ०६-१०.०२.११ इत्यवधौ तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठे प्रचलिते शास्त्रवारिधिशैक्षिककार्यक्रमे शृङ्गेरीपरिसरस्य व्याकरणप्राध्यापकः डा. कृष्णानन्तपद्मनाभः विशिष्टाध्यापकत्वेन भागं गृहीतवान्।

**डा. सि.एस.एस. नरसिंहमूर्तिः** – ११-१५.०२.११ इत्यवधौ तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठे प्रचलिते शास्त्रवारिधिशैक्षिककार्यक्रमे शृङ्गेरीपरिसरस्य व्याकरणविभागाध्यक्षः डा. सि.एस.एस. नरसिंहमूर्तिः विशिष्टाध्यापकत्वेन भागं गृहीतवान्।

**डा. आर. बालाजी-डा. चन्द्रकान्तौ** – ०६-०७.०३.११ मिते काले तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठे 'शिक्षकप्रशिक्षणे प्राचीनभारतीय-चिन्तकानां योगदानम्' इति विषयमधिकृत्य प्रचलितराष्ट्रियकार्यशालायां शृङ्गेरीपरिसरस्य शिक्षाविभागस्य वरिष्ठप्राध्यापकौ डा.आर.बालाजी-डा. चन्द्रकान्तौ भागं गृहीतवन्तौ।

**डा. के. गिरिधररावः** – १४-१५.०३.११ इत्यवधौ बडौदास्थ-एम.एस.विश्वविद्यालयान्तर्गते प्रगतशिक्षाध्ययनकेन्द्रे 'शिक्षकप्रशिक्षणे सामयिकसमस्याः' इति राष्ट्रियसङ्गोष्ठ्यां शृङ्गेरीपरिसरस्य शिक्षाविभागप्राध्यापकः डा. के. गिरिधररावः भागमगृह्णात्।

**डा.सोमनाथसाहु-डा.वेणुगोपालरावौ** – २६-२७.०३.११ इत्यवधौ तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठे 'संस्कृतशिक्षायाम् अनुसन्धानं समस्याश्च' इति विषये प्रचलितायां राष्ट्रियसङ्गोष्ठ्याम् शृङ्गेरीपरिसरस्य शिक्षाविभागप्राध्यापकौ डा. सोमनाथसाहु-डा.वेणुगोपालरावौ भागमगृह्णाताम्।

**डा. रेखाकुमारी** – ३०-३१.०३.११ इत्यवधौ कालडिस्थे श्रीशङ्कराचार्यसंस्कृतविश्वविद्यालये प्रचलितायां राष्ट्रियहिन्दीसङ्गोष्ठ्यां शृङ्गेरीपरिसरस्य हिन्दीप्राध्यापिका डा. रेखाकुमारी भागं गृहीतवती।

**श्रीनीलाभतिवारी** – भोपालपरिसरस्य शिक्षाशास्त्रविभागस्य सहायकाचार्येण तिवारिणा नीलाभेन ०९.०१.११ दिनाङ्के "Strategesic Transformation of Samskrit Institutions." इत्यस्मिन् विषये बेङ्गलूरुनगरे आयोजितायाम् अन्ताराष्ट्रियकार्यशालायां भागः स्वीकृतः। २६-२७.०३.११ इत्यवधौ राष्ट्रियसंस्कृतविद्यापीठे तिरुपतौ आयोजितायां राष्ट्रियसङ्गोष्ठ्यां 'संस्कृतशिक्षायाम् अनुसन्धाने विषयाणां वर्यता' इत्यस्मिन् विषये शोधपत्रवाचनं कृतम्। अनेन महर्षिपतञ्जलिसंस्कृतसंस्थानस्य शिक्षाशास्त्रपत्रोपाधि(D.Ed) पाठ्यक्रमनिर्माणकार्यशालायां भागः गृहीतः।

**श्रीरमणमिश्रः** – भोपालपरिसरस्य अध्यापकेनानेन कालिदाससंस्कृताकादम्या मार्चमासे आयोजिते शाङ्करसमारोहे 'शङ्कराचार्यस्य स्तोत्रसाहित्ये भक्तितत्त्वम्' इति विषयमाधृत्य शोधपत्रवाचनं कृतम्।

**डा. धर्मेन्द्रकुमारसिंहदेवः** – भोपालपरिसरस्य साहित्यविभागे सहायकाचार्येणानेन फरवरीमासे जाबालिपुरे आयोजिते अखिलभारत-राजशेखरसमारोहे 'राजशेखरस्य वक्रोक्तिमीमांसा' इत्यस्मिन् विषये शोधपत्रवाचनं कृतम्। मार्चमासे वाराणस्याम् इन्दिरागान्धिराष्ट्रियकलाकेन्द्रे नाट्यशास्त्रमाधृत्य आयोजितायाम् अन्ताराष्ट्रियसङ्गोष्ठ्यां पर्यवेक्षकत्वेन च भागः गृहीतः।

**डा. प्रदीपपाण्डेयः**- भोपालपरिसरे शिक्षकोऽयं जनवरीमासे उत्तरप्रदेशस्य उरईनगरे आयोजितायां राष्ट्रियशोधसङ्गोष्ठ्यां भागमग्रहीत्।

**डा. अशोकथपालियाल-डा. हंसधरझा-डा. पी.वी.बी. सुब्रह्मण्याः** – भोपालपरिसरस्य अध्यापकाः इमे जनवरीमासे कालिदास-संस्कृताकादम्या आयोजिते भोजमहोत्सवे शोधपत्रवाचनम् अकुर्वन्।

**डा. रमेशझाः** – कालियाचकविक्रमकिशोर-आदर्शसंस्कृतमहाविद्यालयस्य व्याकरणशास्त्रस्य वरिष्ठव्याख्याता डा. रमेशझाः वर्धमानविश्वविद्यालयस्यान्तर्गते पश्चिमबङ्गस्थ-शालडीहामहाविद्यालये १५-१६.०३.२०११ दिनाङ्कयोः विश्वविद्यालयानुदानायोगेनायोजिताया-मखिलभारतीयसङ्गोष्ठ्यां भागं गृहित्वा 'श्रीमद्भगवद्गीतायाः वर्तमानसमाजे प्रभावः' इति शीर्षकाङ्कितनिबन्धमुपास्थापयत्।

**डा. रामलखनपाण्डेयः** – वाराणस्याः इन्दिरागान्धिराष्ट्रियकलाकेन्द्रेण ०८.०३.२०११ तः १०.०३.२०११ दिनाङ्केषु काशीहिन्दूविश्वविद्यालये प्रायोजिते नाट्यशास्त्रीयवैश्विकशोधसम्मेलने लखनऊपरिसरस्याचार्यो रामलखनपाण्डेयस्तत्र गत्वा सहभागितामवाप्नोत्।

**डा. मिनतीरथः** – पुरीपरिसरस्य पुराणेतिहासविभागस्य उपाचार्या इयं १४.०३.२०११ तः १६.०३.२०११ पर्यन्तं भुवनेश्वरे उत्कलविश्वविद्यालये समायोजितायाम् अन्ताराष्ट्रियसङ्गोष्ठ्यां शोधपत्रं प्रस्तूतवती।

**डा. सुकान्तकुमारसेनापतिः** – पुरीपरिसरस्य सर्वदर्शनविभागस्य उपाचार्योऽयं तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठेन ०९-१२.०१.२०११ इत्यवधौ आयोजितायां दार्शनिकचित्रप्रदर्शिनीप्रकल्पकार्यशालायां विषयविशेषज्ञरूपेण भागमवहत्। श्रीजगन्नाथसंस्कृतविश्वविद्यालये विश्वविद्यालया-नुदानायोगपक्षतः १४-१५.०३.२०११ दिनाङ्कयोः आयोजितराष्ट्रियसङ्गोष्ठ्यां 'न्यायनये अपवर्गविमर्शः' इत्यस्मिन् विषये शोधपत्रं प्रास्तौत्। पुरुषोत्तम-प्राच्यविद्यासंशोधनप्रतिष्ठानेन १२-१३.०३.२०११ दिनाङ्कयोः आयोजितायां राष्ट्रियसङ्गोष्ठ्यां विवेकचूडामणौ दार्शनिकविमर्शः इत्यमुं विषयम् उपस्थापयत्।

**डा. ललितकुमारसाहुः** – पुरीपरिसरस्य धर्मशास्त्रविभागे उपाचार्योऽयं २१.०३.२०११ तः ३०.३.२०११ पर्यन्तं नवदेहलीस्थे श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठे 'दायभागस्य ग्रन्थिकमध्ययनम्' इत्यस्यां दशदिवसीयकार्यशालायां विशिष्टविषयप्रवर्तनमकार्षीत्।

**डा. रमाकान्तमिश्रः** – पुरीपरिसरस्य शिक्षाशास्त्रविभागे सहाचार्योऽयं तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठे कृष्णजी जोषी शिक्षाशास्त्री महाविद्यालयः, अकोला, महाराष्ट्रपक्षतः ६-७.०३.२०११ दिनाङ्कयोः आयोजितायां 'शिक्षकप्रशिक्षणकार्यक्रमे प्राचीनभारतीयसम्प्रत्ययानां समावेशः' इत्यस्यां कार्यशालायां भागमवहत्। पुरुषोत्तमप्राच्यविद्यासंशोधनप्रतिष्ठानेन १२-१३.०३.२०११ दिनाङ्कयोः व्याकरणे आयोजितायां राष्ट्रियसङ्गोष्ठ्यां 'कारकविमर्शः' इत्यमुं शोधपत्रमुपस्थापयत्।

## भोपालपरिसरकार्यक्रमाः

**अखिलभारतीयशास्त्रीयस्पर्धा** – ६-८ जनवरी २०११ दिनाङ्केषु ऐषमः बेङ्गलूरुनगरे समायोजितायाम् अखिलभारतीयशास्त्रीयस्पर्धायां २० प्रतिभागिनः सोत्साहं भागं गृहीतवन्तः। तत्र च व्याकरणशलाकायां ज्योतिषभाषणे, श्लोकान्त्याक्षर्यां च पुरस्कारान् सम्प्राप्य छात्राः परिसरस्य गौरवं समेधितवन्तः।

**गणतन्त्रदिवसः** – भारतगणराज्यस्य संविधानस्य अङ्गीकरणदिवसस्मृतौ परिसरे २६.०१.२०११ दिनाङ्के गणतन्त्रदिवसः समाचरितः। प्राचार्येण आजादमिश्रेण अवसरेऽस्मिन् ध्वजारोहणं कृतम्। सः अवसरमुद्दिश्य पाण्डित्यपूर्णरीत्या गणतन्त्रदिवसविषयकम् उद्बोधनम् अकथयत्। अनन्तरं समायोजिते कार्यक्रमे छात्रैः शिक्षकैश्च देशभक्तिगीतभाषणकवितादयः प्रस्तुताः।

**शिक्षाशास्त्रविभागस्य शैक्षिकयात्रा** – ०७-१०.०१.२०११ दिनाङ्केषु बेङ्गलूरुनगरे विश्वसंस्कृतपुस्तकमेलासन्दर्भे शिक्षाशास्त्रविभागस्य शैक्षिकी यात्रा कल्पिता आसीत्। अस्यां शैक्षिकयात्रायां छात्रशिक्षकैः कश्चन विशिष्ट एव अनुभवः प्राप्तः।

**विशिष्टव्याख्यानम्** – ऐषमः ०४.०२.२०११ दिनाङ्के परिसरे आचार्यमेननमहोदयस्य विशिष्टं व्याख्यानं समाकलितम्। तत्र विशिष्टवक्तृत्वेन आचार्यः के. रविशङ्करमेनन, (शिक्षाशास्त्रविभागाध्यक्षः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः) स्वेन व्याख्यायेन परिसरच्छात्राणां मार्गनिर्देशनमकरोत्। अस्य व्याख्यानकार्यक्रमस्य विषयः आसीत् 'शिक्षायाः चरमम् उद्देश्यम्'। कार्यक्रमसंयोजनं शिक्षाशास्त्रविभागस्य सहायकप्राध्यापकः श्रीनीलाभतिवारी अकरोत्।




कार्यक्रमे भाषमाणः प्राचार्यः आजादमिश्रः

**संविद्-विकास-परिषद्** – संविद्-विकास-परिषदि छात्राणां भाषणकौशलवर्धनाय स्वपठितग्रन्थेभ्यः विषयम् अधिकृत्य स्पर्धाः समायोजिताः। अपि च तत्र छात्राणां प्रतियोगितापरीक्षार्थं विविधविषयम् अवलम्ब्य प्राध्यापकानाम् अपि विशेषसमुद्बोधनं सम्पन्नम्।

**शास्त्रमीमांसासमितिः** – अस्यां समितौ परिसरस्य प्राध्यापकाः स्वं स्वं शास्त्रम् आधारीकृत्य शोधात्मकं व्याख्यानं प्रस्तुतवन्तः। तेषां च आलेखानां प्रकाशनं शास्त्रमीमांसापत्रिकायां जातम्।



वृक्षरोपणस्य किञ्चन दृश्यम्

**वृक्षारोपणम्** – नूतनपरिसरभवने फरवरीमासान्ते प्राचार्यप्रमुखैः परिसरप्राध्यापकैः पर्यावरणसंरक्षणाय वृक्षारोपणं सम्पादितम्।

**भारतीयज्योतिषपाठ्यक्रमशिक्षणम्** – त्रैमासिकं शिक्षणमिदं संस्थाने ऐषमः ०३.०३.२०११ तः १९.०५.२०११ पर्यन्तं निश्चितमस्ति। त्रैमासिकस्यास्य शिक्षणस्य इदं पञ्चमं चक्रम् अस्ति। अस्य समन्वयकः डा.हंसधर झाः सहसमन्वयकः डा.पी. वी.बी.सुब्रह्मण्यम् च वर्तेते।

**भोजराजपञ्चाङ्गम्** – ज्योतिषविभागीयविदुषां महता प्रयासेन ऐषमः इदम्प्रथमतया भोपालस्य समयमानदण्डाधारितं पञ्चाङ्गं निर्मितं प्रकाशितं च। अस्य भोजराजपञ्चाङ्गस्य कालः वि.स. २०६८ सन् २०११-१२ वर्तते। अस्य प्रधानसम्पादकः आचार्य आजादमिश्रः, सम्पादकाः डा. हंसधरझा, डा. पी. वी. बी सुब्रह्मण्यम्, डा. अशोकथपलियालः, श्रीअवधेशश्रोत्रियः च सन्ति। भोजराजस्य शासनकालस्य सहस्राब्दपूर्तौ तस्य कृतौ पञ्चाङ्गमिदं प्रवर्तितम्।

**राष्ट्री-२०११** – प्रतिसत्रमिव अस्मिन् सत्रेऽपि 'राष्ट्री' नाम परिसरीयवार्षिकपत्रिकेयं प्रकाशं नीता। तत्र संस्कृते हिन्द्याम्, आङ्ग्लभाषायां च छात्रैः विद्वद्भिश्च सम्पादिताः शास्त्रीयाः सामाजिकाः सांस्कृतिकाश्च विविधा निबन्धाः कविताः च प्रकाश्यन्ते।

## गङ्गानाथझापरिसरवृत्तान्तम्

**व्याख्यानमाला** – ३-४ मार्च, २०११ दिनाङ्कयोः परिसरे 'संस्कृते कविसमयः' इति विषयमधिकृत्य द्विदिवसीया काचित् व्याख्यानमाला समायोजिता। अस्यां पञ्चसत्रात्मिकायां व्याख्यानमालायां सत्रक्रमेण आचार्यः त्रिविक्रमनारायणधर्माधिकारी 'वैदिकवाङ्मये कविसमयः', गौतमभाईपटेलः 'भासनाटकचक्रे कविसमयः', आचार्यरमाकान्तशुक्लः 'आधुनिकसंस्कृतकाव्येषु कविसमयः', आचार्यः अभिराजराजेन्द्रमिश्रः 'मुक्तककाव्येषु कविसमयः', डा. इच्छाराममद्विवेदी 'वाल्मीकीयरामायणे कविसमयः' चेति निर्दिष्टान् विषयानाधृत्य स्वीयाभिप्रायं प्राकटयन्। परिसरप्राचार्यः डा. प्रकाशपाण्डेयः समागतानाम् अतिथीनां स्वागतं व्याहरत्। कार्यक्रमसञ्चालनं डा. जनार्दनप्रसादपाण्डेयः 'मणिः' अकरोत्।

## मुम्बईस्थस्य क. जे. सोमैयाविद्यापीठस्य वार्ता

**शिक्षाशास्त्रविशिष्टव्याख्यानमाला सम्पन्ना** – राष्ट्रियसंस्कृतसंस्थानस्य क. जे. सोमैयाविद्यापीठस्य मुम्बईस्थितस्य शिक्षाशास्त्रविभागस्य विशिष्टव्याख्यानकार्यक्रमः ०८.०३.२०११ तमे दिनाङ्के सुष्ठु सम्पन्नः। कार्यक्रमेऽस्मिन् मुख्यवक्तृरूपेण पनवेलस्थितस्य केन्द्रीयविद्यालयस्य प्राचार्यः डा. नारायणदत्तजोशी समुपस्थितः आसीत्। कार्यक्रमस्य प्रारम्भः विद्यापीठछात्रैः विहितेन वेदमन्त्रोच्चारणेन अभवत्। 'व्यक्तित्वविकासे शिक्षकस्य भूमिका' इति विषयमधिकृत्य अत्यन्तं विशिष्टं व्याख्यानं सः प्रायच्छत्। जोशीमहोदयः 'अध्यापकः स्वयं व्यक्तित्वविकासाय किं कुर्यात् तथा च छात्राणां व्यक्तित्वविकासाय तेन किं किं कार्यमि'ति विषयमधिकृत्य प्राचीनभारतीयसिद्धान्तान् आधुनिकमनोवैज्ञानिकसिद्धान्तान् च पुरस्कृत्य सोदाहरणं प्रत्यपादयत्। परिसरप्राचार्येण आचार्य एम. ए. बाबूवर्येण आध्यक्ष्यं निर्व्यूढम्। स्वागतभाषणं समन्वयनं च शिक्षाशास्त्रविभागाध्यक्षेण डा. के.के.शैनवर्येण विहितम्। कार्यक्रमस्य सञ्चालकः डॉ. देवदत्तसरोदे आसीत्। डा. गायत्रीमुरलीकृष्णेन कृतज्ञताभाषणं विहितम्।

परिसरवार्ता

## गुरुवायूर्परिसरवार्ता

**वार्षिकोत्सवः** – ११.०३.२०११ दिनाङ्के परिसरस्य वार्षिकोत्सवः सम्पन्नः। तृश्शूर्मण्डलाधिकारी श्री पि. जि. तोमस् (आई. ए. एस.) महोदयः वार्षिकोत्सवस्य उद्घाटनं कृतवान्। अस्मिन् कार्यक्रमे एम. पी. सुरेन्द्रः (उपसम्पादकः मातृभूमिपत्रिका, तृश्शूर्) मुख्यभाषणं व्यधात्। आचार्यलक्ष्मीनारायणशर्मा स्वागतभाषणं डा.इ. एम. राजन् कृतज्ञताभाषणं च अकुरुताम्।



कार्यक्रमे मञ्चस्थाः वामतः सी.एल. सिसिली, पी.सी. मुरलीमाधवः, मौरीन पी हाल्, सी.एल.एन.शर्मा डा. इ.एम. राजन् च

**पि.टि. कुरियाक्कोस् स्मारक-प्रभाषणपरम्परा** – राष्ट्रियसंस्कृतसंस्थानस्य गुरुवायूर्परिसरस्य बीजावापः शतवर्षेभ्यः पूर्वं संस्कृतप्रणयभाजनं श्री.पि.टि. कुरियाक्कोस्महाशयेन कृतम्। कुरियाक्कोस्महोदयस्य निश्शुल्कनिस्वार्थसेवनमनुस्मृत्य राष्ट्रियसंस्कृतसंस्थानेन पि.टि. कुरियाक्कोस् स्मारकप्रभाषणपरम्परा आयोज्यते। अस्याः परम्परायाः द्वितीयं वार्षिकप्रभाषणं २३.०२.२०११ दिनाङ्के तस्य समाधिदिने एव सम्पन्नम्। आचार्या मौरीन् पि. हाल्वर्या (अध्यापनाध्ययनविभागः मस्साचुसेट्स् विश्वविद्यालयः, डार्टमौत्, अमेरिका) "Binding the Heart and Mind-Community as a device for linking cognitive and affective learning" इत्यस्मिन् विषये मुख्यभाषणं कृतवती। कालटिस्थ-श्रीशङ्कराचार्यसंस्कृतसर्वकलाशालास्थसङ्घायप्रमुखः आचार्यः पी. सी. मुरलीमाधवः आशंसाभाषणेन सभायाः शोभां परिवर्धितवान्। श्रीलक्ष्मीनारायणशर्मणः आध्यक्ष्ये आचार्य सी. एल. सिसिली, डा. इ. एम. राजन् यथाक्रमं स्वागतभाषणं कृतज्ञतानिवेदनञ्च अनिर्वहताम्। डा.हर्षकुमारः सभासञ्चालकः आसीत्। कुरियाक्कोस् स्मृतिमण्डपे वरिष्ठाध्यापकानां पुष्पार्चनानन्तरं सभा समारब्धा। परिसरीयाः छात्राः कार्यक्रमेऽस्मिन् भागं गृहीतवन्तः।


सेवानिवृत्तिकार्यक्रमावसरे निवृत्तप्राचार्याय स्मृतिचिह्नं यच्छन् डा. जी.आर्.मिश्रः

**सेवानिवृत्तिकार्यक्रमः** – गुरुवायूर्परिसरस्य प्राचार्यः आचार्यः के.टी. माधवन् महोदयः ३१ मार्च, २०११ दिनाङ्के स्वीयसेवाकालं प्रपूर्य सेवानिवृत्तो जातः। अवसरमेतं निमित्तीकृत्य निर्दिष्टे दिनाङ्के परिसरे कश्चन कार्यक्रमः आयोजितोऽभूत्। तत्र सर्वैः परिसरसदस्यैः प्राचार्याय शुभेच्छा प्रकटिता। कार्यक्रमेऽस्मिन् राष्ट्रियसंस्कृतसंस्थानस्य परीक्षानियन्त्रकः डा. जी.आर. मिश्रः स्वाभिप्रायं प्राकटयत्।



कार्यक्रमे मञ्चस्थाः विशिष्टाः विद्वांसश्च

## जम्मूपरिसरवृत्तान्तम्

**वार्षिकोत्सवः** – २२.०३.२०११ दिनाङ्के परिसरेऽस्मिन् वार्षिकोत्सवः आयोज्यत। कार्यक्रमेऽस्मिन् मुख्यातिथित्वेन जम्मूकश्मीरप्रान्तस्य महामहिमराज्यपालः श्री एन्. एन्. वोहरा, अध्यक्षत्वेन संस्थानकुलपतिः आचार्यः राधावल्लभत्रिपाठी विशिष्टातिथित्वेन आचार्यः अभिराजराजेन्द्रमिश्रः च सभां व्यभूषयन्। परिसरप्राचार्येण विश्वमूर्तिशास्त्रिणा सस्वागतं वार्षिकं प्रतिवेदनं प्रस्तुतम्। अवसरेऽस्मिन् परीक्षासु स्पर्धासु च स्थानभाजो विद्यार्थिनः पुरस्कारैः सभाजिताः। धन्यवादज्ञापनम् आचार्यः एम्. चन्द्रशेखरः कार्यक्रमसञ्चालनम् आचार्यः वैद्यनाथझा च अकुरुताम्।

## गरलीपरिसरस्य गतिविधयः

**शैक्षिकस्पर्धानां क्रीडास्पर्धानाञ्चायोजनम्** – वर्तमानसत्रे परिसरस्यास्य वार्षिकशैक्षिकस्पर्धाः फरवरीमासस्य तृतीये, चतुर्थे सप्तमे च दिनाङ्के सम्पन्नाः। तत्र संस्कृतभाषणं, शास्त्रीयभाषणं (व्याकरणसाहित्यज्यौतिषविषयेषु), हिन्दीभाषणं, संस्कृतनिबन्धलेखनम्, आंग्लभाषणं, हिन्दीनिबन्धलेखनम्, आंग्लनिबन्धलेखनं, श्लोकान्त्याक्षरी, संस्कृतगीतिका इत्यादिस्पर्धानामायोजनमभूत्। तत्र ६९ छात्राः पुरस्कृताः अभूवन्। १०-११.०२.११ दिनाङ्कयोः वार्षिकक्रीडास्पर्धाः समायोजिताः। शैक्षिकस्पर्धानां क्रीडास्पर्धानां च सञ्चालनं डा. अशोकचन्द्रगौडशास्त्रिणा विहितम्। क्रीडास्पर्धानां संयोजनं डा. किशोरकुमारदलाई अकरोत्। तत्र ३२ छात्राः व्यक्तिगतरूपेण ६० छात्राश्च दलगतरूपेण पुरस्कृताः अभूवन्।

**ज्यौतिषविषयकं विशिष्टं व्याख्यानम्** – २५.०२.२०११ दिनाङ्के आचार्यरामचन्द्रपाण्डेयः (बनारसहिन्दूविश्वविद्यालयस्य पूर्वज्योतिषविभागाध्यक्षः) परिसरे कालमानविषयकं विशिष्टव्याख्यानमकरोत्। अत्र संस्थानपरिवारजनैः सह अन्येऽपि ज्यौतिषजिज्ञासवः समवेता अभूवन्। व्याख्यानस्यानन्तरं नितरां मनोरञ्जकः ज्ञानवर्धकः च शङ्कासमाधानकार्यक्रमोऽभूत्। एतेन परिसरजनाः भृशं लाभान्विताः सन्तः आचार्यं पाण्डेयं प्रति नितरां कृतज्ञतां प्रकटितवन्तः। कार्यक्रमस्य सञ्चालनं ज्यौतिषप्राध्यापकः डा. उमेशकुमारपाण्डेयः अकरोत्।

परिसरवार्ता




वार्षिकोत्सवकार्यक्रमावसरे मञ्चस्थाः वामतः के.वी.सुब्बरायुडुः, राधावल्लभत्रिपाठी रामचन्द्रपाण्डेयश्च

**वार्षिकोत्सवः** – २६.०२.२०११ दिनाङ्के परिसरस्य वार्षिकोत्सवः महता हर्षोल्लासेन समायोजितः। अस्मिन्नवसरे राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः आचार्यराधावल्लभत्रिपाठी मुख्यातिथिरूपेण समुपस्थाय समारोहमिमं सनाथितवान्। वाराणसीतः आचार्यः रामचन्द्रपाण्डेयः विशिष्टातिथिरूपेण समारोहमिमं व्यभूषयत्। कुलपतिः विपाशातीरे निर्मीयमाणं भव्यस्वरूपं नूतनं परिसरभवनं निभाल्य नितरां हर्षप्रकर्षं प्रकटितवान्। वार्षिकोत्सवकार्यक्रमेऽस्मिन् परिसरप्राचार्यः के. वी. सुब्बरायुडुः वार्षिकप्रतिवेदनं प्रस्तुतवान्। प्राचार्यः आशां प्रकटितवान् यदग्रिमे सत्रे जुलाईमासेऽस्माकं विपाशातीरगतो नवपरिसरः उपयोगाय सज्जो भविष्यतीति। संस्थाहितार्थम् अहर्निशं जागरूकः प्राचार्यः नवपरिसरस्य निकटस्थं वनविभागस्य विशालं भूखण्डं संस्थायाः कृते प्रापयितुं विशिष्टं प्रयासं विहितवान्। कुलपतिः आचार्यराधावल्लभत्रिपाठी स्वकीयोद्बोधनेन छात्रान् अध्यापकांश्च प्रेरितवान् यत् संस्कृतक्षेत्रे नवनवं कर्तुमसीमिताः सम्भावनाः सन्ति, तत्र संस्थानेन महती भूमिका निर्वोढव्यास्ति। एतदर्थं भवद्भिः बद्धपरिकरैः विशेषेण प्रयत्नपरायणैर्भाव्यम्।




परिसरपत्रिकायाः लोकार्पणदृश्यम्

कार्यक्रमेऽस्मिन् 'वेद-विपाशा' इति परिसरस्य वार्षिकपत्रिकायाः, ज्यौतिषविभागाध्यक्षेण डा. मदनमोहनपाठकेन सम्पादितायाः भास्करोदयाख्यायाः ज्यौतिषविभागीयायाः वार्षिकपत्रिकायाः, व्याकरणप्राध्यापकेन डा. उमेशमिश्रेण निबद्धस्य 'वैयाकरणभूषणसारे धात्वर्थस्य समीक्षा पद्मनाभव्याख्या च' इत्याख्यस्य ग्रन्थस्य च लोकार्पणं जातम्। कुलपतिसारस्वतातिथिभ्यां क्रीडास्पर्धासु शैक्षिकस्पर्धासु च विजयिभ्यः छात्रेभ्यः पुरस्कारवितरणं कृतम्। छात्रैः हिमाचलीयलोकगीतनृत्यपुरस्सरं मनोहरः सांस्कृतिककार्यक्रमः प्रस्तुतः। तत्र भानुशर्मा, सन्तोषकुमारी, अरुणाशर्मा, रुपालीजोशी चेति छात्राः प्राचार्यपक्षतः विशेषपुरस्कारेण पुरस्कृताः। ऐषमः अखिलभारतीयस्पर्धायां श्लोकान्त्याक्षरीस्पर्धायां रजतपदकं विजितवती अलकाकुमारी अपि समारोहेऽस्मिन् विशेषपुरस्कारेण पुरस्कृता। परिसरकार्यालये अनुभागाधिकारी श्रीजसवन्तसिंहस्तदीयां कार्यनिष्ठाम् अर्थशुचितां चाभिलक्ष्य परिसरप्राचार्येण कुलपतिवर्येण च स्मृतिचिह्नप्रदानपुरस्सरं सम्मानितः सविशेषं प्रशंसितश्च। ज्यौतिषविभागाध्यक्षः डा. मदनमोहनपाठकः समारोहे समागतानां स्वागतं व्याहृतवान्। व्याकरणविभागे उपाचार्यः अशोकचन्द्रगौडः धन्यवादज्ञापनमकार्षीत्। कार्यक्रमस्य सञ्चालनं साहित्यविभागाध्यक्षेण डा. विजयपालशास्त्रिणा कृतम्।

**स्थानान्तरे सौप्रस्थानिकं स्वागतञ्च** – २७.०३.२०११ दिनाङ्के साहित्यविभागस्य प्राध्यापिका सुश्रीमोहिनी अरोरा भोपालपरिसरस्य कृते स्थानान्तरादेशे सति सौप्रस्थानिकसमारोहः प्राचार्यस्य के. वी. सुब्बरायुडुमहोदयस्याध्यक्षत्वे समायोजितः। अत्र परिसरस्याध्यापकैः कर्मचारिभिः छात्रैश्च ससम्मानमत्रभवत्याः सौप्रस्थानिकमङ्गलमाचरितम्। तदग्रिमे च दिवसेऽत्रभवत्याः स्थाने भोपालपरिसरात् समागतस्य प्राध्यापकस्य डा. सुज्ञानकुमार-मोहन्तीमहोदयस्य स्वागतं प्राचार्यपुरोगमैः परिसरस्याध्यापकैः कर्मचारिभिश्च सोल्लासं विहितम्।

**हिमाचलप्रदेशीयसंस्कृतसम्मेलनम्** – राष्ट्रियसंस्कृतसंस्थानस्य गरलीपरिसरपक्षतः २८–२९.०३.२०११ दिनाङ्के ज्वालामुखीति प्रसिद्धस्य शक्तिपीठस्य परिसरे हिमाचलप्रदेशीयसंस्कृतमहाविद्यालयानां प्राचार्यगणस्य शिक्षकगणस्य च सम्मेलनं आचार्यस्य के. वी. सुब्बरायुडुमहोदयस्याध्यक्षत्वे समायोजितम्। सम्मेलनेऽस्मिन् राष्ट्रियसंस्कृतसंस्थानस्य पूर्वाध्यक्षा पूर्वसंसत्सदस्या च डा. सरोजिनी महिषी मुख्यातिथिरूपेण समागता। अत्र हिमाचलप्रदेशे संस्कृतस्य स्थितिमुन्नेतुं चर्चा कृता। हिमाचलप्रदेशविश्वविद्यालयेन आचार्योपाधिः एम. ए. संस्कृतसमकक्षः न मन्यते, तेन छात्राणां महान् क्लेशो भवति। तं दूरीकर्तुं सम्मेलने सहभागिभिर्निर्णीतं यदेकं शिष्टमण्डलं संस्थानपक्षतः संस्कृतमहाविद्यालयानां पक्षतश्च हिमाचलविश्वविद्यालयकुलपतिना सह संवादं कुर्यादिति। अन्यच्च हिमाचलप्रदेशे स्वतन्त्रां संस्कृतशिक्षापरिषदं रचयितुं प्रथमकक्षात एव संस्कृतमध्यापयितुं संस्कृतशिक्षणसंस्थानामनुदानं वर्धयितुञ्च राज्यसर्वकारः शिष्टमण्डलेन निवेदनीय इत्यपि निर्णीतम्।




सम्मेलने विचारमग्नाः विद्वांसः

मुख्यातिथिरूपेण भाषमाणा विख्याता संस्कृतविदुषी डा. सरोजिनी महिषी अवोचत् यत् संस्कृतसाहित्यं विश्ववाङ्मये नूनमनुपममस्ति। संस्कृतस्य सरसता शिक्षाप्रदता संस्काराधायकता च भारतस्य कृते अनिवार्याऽस्ति। अत्रभवती उक्तवती यद्यपि हस्तलिखितग्रन्थरूपेण अपारज्ञानराशिः अप्रकाशितस्तिष्ठति। संस्कृतज्ञैः तस्य सम्पादने प्रकाशने च विशिष्टप्रयासाः विधेयाः। डॉ. महिषी सविशेषमेतत् प्रत्यपादयत् यत् योगायुर्वेदज्यौतिषादिविषयातिरिक्तं न्यायप्रक्रियायाः सम्यक् ज्ञानायापि न्यायाधीशानां कृते संस्कृतज्ञानमनिवार्यमस्तीति।

कार्यक्रमसञ्चालनं डा. विजयपालशास्त्रिणा विहितम्। कार्यक्रमस्यान्ते समारोहाध्यक्षः परिसरप्राचार्यः प्रैरयत् यत् सर्वैः सम्भूय संस्कृतस्योन्नतये प्रयतनीयम् उपाधिमान्यताविषयिणी समस्या च निराकरणीया। अत्रभवान् प्रतिज्ञातवान् यदेतदर्थं गरलीपरिसरपक्षतः सर्वविधं साहाय्यं प्रोत्साहनञ्च करिष्यते इति।

## जयपुरपरिसरे आयोजिताः कार्यक्रमाः




सांस्कृतिकसन्ध्यायाः किञ्चन दृश्यम्

**छात्रावासे आयोजिता सांस्कृतिकसंध्या** – १५.०३.२०११ दिनाङ्के राष्ट्रियसंस्कृतसंस्थानस्य जयपुरपरिसरस्य पुरुषमहिलाछात्रावासयोः संयुक्ततत्त्वाधाने सांस्कृतिकसन्ध्यायाः आयोजनं जातमासीत्। अस्मिन् कार्यक्रमे संस्थानस्य कुलपतिः आचार्यः राधावल्लभत्रिपाठी आध्यक्ष्यं निरवहत्। तेन सह कार्यक्रमस्य शोभाभिवर्धनार्थम् अधिमञ्चं समासीनौ आस्तां राजस्थानविश्वविद्यालयस्य शिक्षाविभागस्य सङ्कायाध्यक्षः आचार्यभूपेन्द्रसिंहराठौड आचार्यवेदप्रकाशश्च। छात्रोत्साहसमन्वितेऽस्मिन् कार्यक्रमे छात्रावासस्य मुख्याधिष्ठाता आचार्यफतहसिंहः वार्षिकप्रतिवेदनं प्रास्तौत्। तेन स्वकीये भाषणे अन्तेवासिनामुपलब्धय अपि प्रकाशिताः। कुलपतिना पूर्वाधिष्ठातृभ्यः क्रमशः आचार्य अर्कनाथचौधरी, आचार्यसुदेशशर्मा, डा. ओमप्रकाशभडाना, डा. रमाकान्तपाण्डेयः इत्यादिभ्यः स्मृतिचिह्नादिप्रदानेन सम्मानमनुष्ठितम्। अस्यामेव शृंखलायां सहायकानां श्रीराजेशशर्मा, श्रीपरमेश्वरदयालशर्मा, श्रीरतनसिंहः, श्रीश्रवणसिंहः इत्यादीनामपि कुलपतिः सम्माननमकरोत्। सम्प्रति छात्रावासस्य मुख्याधिष्ठातृपदम् अलङ्कुर्वते आचार्यफतहसिंहाय स्मृतिचिह्नश्रीफलादिप्रदानेन कुलपतिना प्रशंसापुरस्सरं सम्माननं विहितम्। तदनन्तरं भारतस्य विविधप्रदेशसम्बन्धिताश्छात्राः विविधसांस्कृतिकप्रस्तुतिमाध्यमेन निजसंस्कृतेः प्रदर्शनमकुर्वन्।

कार्यक्रमस्य मध्ये परिसरस्य प्राचार्यः अर्कनाथचौधरी छात्रावासीयछात्राणामुपलब्धीनां सहर्षं प्रशंसां कुर्वन् अकथयत् यदस्मदीयाश्छात्रा उन्नतिशिखरं प्राप्नुयुरिति धिया वयमपि तेषां सहायताकरणार्थं प्रतिपदं सन्नद्धाः। संस्थानस्य कुलपतिवर्यश्छात्राणां साफल्यं दृष्ट्वा हर्षमनुभूतवान्। तेनोक्तं यत् 'जयपुरपरिसरः सर्वेषु परिसरेषु संख्यात्मकगुणात्मकदृष्ट्या मूर्ध्नि विराजते। इतोऽपि गौरववन्तो भवन्तो भवेयुरिति धिया अस्त्यावश्यकता कठिनपरिश्रमस्य। छात्रावासो हि तादृशं स्थानं कल्पयति यस्मिन् छात्राः अभिभावकेभ्यः पृथक् भूत्वा अध्ययनमनुतिष्ठन्ति। एवं शिक्षाया वास्तविकार्थं परिचाययति।' संध्यायाः सञ्चालनं छात्रावासस्य सहायकाधिष्ठातृपदमलङ्कुर्वन् डॉ. सुरेशसिंहः अकरोत्। कार्यक्रमे अतिथीनां स्वागतं महिलाछात्रावासस्य अधिष्ठात्री सुश्रीमीना अकरोत्।



डा. सरोजिनीमहिषीम् अभिनन्दयन्
प्राचार्यः अर्कनाथचौधरी

**वार्षिकोत्सवः** – परिसरेऽस्मिन् २६.०२.२०११ तमे दिनाङ्के वार्षिकोत्सवस्यायोजनमभवत्। समारोहेऽस्मिन् अध्यापकानाम् अभिनन्दनं, वार्षिकपुरस्कारवितरणम् अथ च निम्बार्कवैदिकसंस्कृत-सामान्यज्ञानपरीक्षायाः पुरस्कारवितरणमपि समभवत्। कार्यक्रमे पं. श्रीबृजकिशोरशर्मा (परिवहनशिक्षामन्त्री राजस्थानसर्वकारः), सम्मान्या डा. सरोजिनीमहिषी (पूर्वकेन्द्रीय-मन्त्री अपि च संस्थानस्य पूर्वोपाध्यक्षा), डा. के. के. पाठकः (सचिवः, राजस्थानलोकसेवाऽऽयोगः), डॉ. मोहनलालयादवः (उपशासनसचिवः) श्रीहरिशङ्करभारद्वाजः (निदेशकः, संस्कृतशिक्षा, राजस्थानम्), श्रीशीतलचन्दजैनः, श्रीविश्वासजाङ्गिडः, महन्तश्रीमोहनशरणशास्त्री, राजेश्वरीभट्टः इत्यादयः संस्कृतजगतः नैके गणमान्याः विद्वांसः च उपस्थिताः आसन्।

डा. सरोजिनीमहिषीमहोदयया संस्कृतस्योत्थानाय प्रवर्धनाय च स्वकीया सद्भावनाः प्रकटिताः। 'जनसामान्ये संस्कृतस्य व्यावहारिकं ज्ञानं प्रसरेत् तदर्थं प्रारम्भिकशिक्षातः उच्चशिक्षां यावत् संस्कृतभाषा अनिवार्यविषयत्वेन अङ्गीकरणीया। संस्काराणां समायोजनं, संस्कृतेः संरक्षणम् इत्यादयः महत्त्वपूर्णाः विचाराः संस्कृतस्याध्ययनाध्यापनाभ्यां स्वतः एव समागच्छन्ति।' इति प्रेरणास्पदं विचाराः तया प्रस्तुताः। पं. बृजकिशोरशर्मणा कार्यक्रमे भणितम् यत् 'यावत्संस्कृतमस्ति, यस्यां दशायां च संस्कृतं वर्तते सा एव दशा अस्माकं राष्ट्रस्यापि। विश्वेऽपि यदि भारतं शिरोरूढं कल्प्यते चेदावश्यकताऽस्ति संस्कृतस्य संस्कृतेः संस्काराणाञ्च अङ्गीकरणस्य। ज्येष्ठानामादरः, गुरवे समर्पणम्, व्यक्तित्वे निर्मलता यदि नास्ति चेत् जनः धनिकः सन्नपि निर्धन एव।' राजस्थानलोकसेवाऽऽयोगस्य सचिवेन डा. के.के. पाठकेन प्राथमिकमाध्यमिकोच्चमाध्यमिकपरीक्षासु देहलीसेवाचयनायोगस्य परीक्षासु चितानां संस्थानस्य विद्यार्थिनां कृते सद्भावना समर्पिता। 'युगपरिवर्तनाय शिक्षाव्यवस्था परिवर्तनीया' इति बोधितं निम्बार्कवैदिकसंस्कृतसमितेः महन्तश्रीमोहनशरणशास्त्रिणा। प्राचार्यः अर्कनाथचौधरी सत्रादस्मात्परिसरस्य शैक्षिकमन्त्रालयिककर्मचारिणाम् उत्साहवर्धनाय प्रतिवर्षं वार्षिकोत्सवे वर्षे सर्वोत्कृष्टसहयोगाय कर्मचारिणां सम्माननमुद्घोषितवान्। संस्थानपरिसरेऽस्मिन् इदम्प्रथमतया डा. रामकुमारशर्म-आचार्यफतहसिंह-श्रीमतीनमितामित्तलाः इत्येतेषां सम्माननं सञ्जातम्।



वार्षिकोत्सवावसरे भाषमाणः प्राचार्यः अर्कनाथचौधरी

राष्ट्रियसंस्कृतसंस्थानस्य शैक्षिकगतिविधीनां त्रैमासिकी पत्रिका 'परिसरसन्देशः' अथ च डा. रमाकान्तपाण्डेयस्य सम्पादितग्रन्थ-'ईश्वरविलास में जयपुर-वर्णन' इत्यनयोः लोकार्पणमपि जातम्। 'यज्ञशाला संवत्सर कार्लदर्शनं वि. सं. २०६८' इत्यस्य विमोचनमपि अभवत्। कार्यक्रमस्य सञ्चालनं डॉ. रमाकान्तपाण्डेयेन धन्यवादज्ञापनं प्राचार्येण अर्कनाथचौधरीवर्येण च विहितम्।

## लखनऊपरिसरीया वार्ता

**त्रिदिवसीया पालि-प्राकृत-संस्कृतच्छायाकार्यशाला** – परिसरस्य बौद्धदर्शनविभागेन १४.०३.२०११ तः १६.०३.२०११ पर्यन्तं पालि–प्राकृतयोः संस्कृतच्छायामधिकृत्य समायोजितायामखिलभारतीयकार्यशालायां देशस्य द्वादश मूर्धन्या विद्वांसः समुपस्थिताः। तत्र पालिभाषाया इतिवुत्तक–उदान–पेतवत्थु–थेरगाथानां सम्पन्नसंस्कृतच्छायाकार्यस्य समीक्षा जाता। प्राकृतभाषया सम्पाद्यमानं शब्दकोशं तदतिरिक्तसाहित्यसंवर्धनकार्यं चाधिकृत्य विचाराः प्रवर्तिताः। सन्दर्भेऽस्मिन् कुलपतिः पालि–प्राकृतविदुषां सम्माननं विहितवान्।

**विशिष्टव्याख्यानमाला** – परिसरेऽस्मिन् फरवरीमार्चमासयोर्मध्ये पञ्च विशिष्टानि व्याख्यानानि सम्पन्नानि। १७.०२.२०११ दिनाङ्के शिक्षाशास्त्रस्य विशिष्टो विद्वान् नवदेहलीस्थस्य श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठस्य पूर्वकुलपतिः आचार्यः श्रीधरवशिष्ठः 'शिक्षा, शिक्षकः, शिक्षार्थी च' इति विषयमधिकृत्य स्वीये व्याख्याने भारतीयसंस्कृतेः शैक्षिकं संवर्धनं प्रत्यपादयत्। १४.०३.२०११ दिनाङ्के प्राचार्यस्य श्रीमतः सुरेन्द्रझामहोदयस्याध्यक्षे सम्पन्नायां साहित्यशास्त्रीयव्याख्यानमालायां वृन्दावनस्थ–रङ्गलक्ष्मीसंस्कृतमहाविद्यालयस्य प्राचार्येण डा. रामकृपालत्रिपाठिना 'ध्वनिम'धिकृत्य व्याख्यानं प्रस्तुतम्। ११.०३.२०११ दिनाङ्के आचार्यस्य उमारमणझामहोदयस्याध्यक्ष्ये सम्पूर्णानन्दसंस्कृतविश्वविद्यालयास्याचार्यः आचार्यरामपूजनपाण्डेयः न्यायदर्शने 'अभेदान्वय'मधिकृत्य व्याख्यानमकरोत्। १६.०३.२०११ दिनाङ्के पद्मश्रीविभूषितः आचार्यरामशङ्करत्रिपाठी 'बौद्धदर्शने भगवतो बुद्धस्य शिक्षा'मधिकृत्य कुलपतेः आचार्यराधावल्लभत्रिपाठिनः अध्यक्षतायां सुबोधं व्याख्यानमदात्। २५.०३.२०११ दिनाङ्के प्राचार्यस्याध्यक्षतायां सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्याचार्यः उमाशङ्करशुक्लो 'भारतीयज्योतिषे कालगणना'मवलम्ब्य सारगर्भितं निजं व्याख्यानं प्रास्तौत्।

**वार्षिकोत्सवः** – १६.०३.२०११ दिनाङ्के परिसरस्यास्य वार्षिकोत्सवः समायोजितः। राष्ट्रियसंस्कृतसंस्थानस्य कुलपतेः आचार्यराधावल्लभत्रिपाठिनः आध्यक्षे, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य कुलपतिचरस्य अभिराजराजेन्द्रमिश्रस्य मुख्यातिथित्वे, पद्मश्रीविभूषितस्य आचार्यरामशङ्करत्रिपाठिनः सारस्वतातिथित्वे च सम्पद्यमाने वार्षिकोत्सवे परिसरप्राचार्यः सुरेन्द्रझा स्वागतभाषणेन सहैव वार्षिकं प्रतिवेदनमपि प्रास्तौत्। अवसरेऽस्मिन् जनवरीमासस्यान्तिमे सप्ताहे फरवरीमासस्यादिमे सप्ताहे च परिसरे सञ्जातासु वार्षिकस्पर्धासु विजयिनो विद्यार्थिनः कुलपतिना अतिथिभिश्च पुरस्कृताः।

परिसरवार्ता



उद्घाटनकार्यक्रमस्य किञ्चन दृश्यम्

## पुरीस्थ–श्रीसदाशिवपरिसरे प्रवृत्ताः कार्यक्रमाः

**वार्षिकोत्सवः** – श्रीसदाशिवपरिसरे ऐषमः वार्षिकोत्सवः १८.०३.२०११ तमे दिनाङ्के महता वैभवेन समनुष्ठितः। तत्र संस्थानस्य कुलसचिवः आचार्यरामानुजदेवनाथः मुख्यवक्तृभाषणमकरोत्। श्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य कुलपतिः आचार्यनीलकण्ठपतिः कार्यक्रमेऽस्मिन् मुख्यातिथिः आसीत्। कार्यक्रमस्य प्रारम्भे डा. के. वि. सोमयाजी मङ्गलमाचरत्। आचार्यः अतुलकुमारनन्दः सर्वेषामभ्यागतानां स्वागतं व्याहरत्। वार्षिकप्रतिवेदनं डा. सूर्यमणिरथः अपठत्। परिसरप्राचार्यः डा.जि. गङ्गन्ना आध्यक्ष्यभाषणमकरोत्। सन्दर्भेऽस्मिन् परिसरस्य त्रैमासिक्याः वार्तापत्रिकायाः सदाशिवसन्देशस्य, वार्षिकपत्रिकायाः 'पौर्णमासी' इत्यस्याः, साहित्यविभागस्य पत्रिकायाः 'साहित्यसौरभम्' इत्यस्याः, सर्वदर्शनविभागस्य 'दर्शनप्रभा' इत्यस्याः पत्रिकायाः च लोकार्पणं सञ्जातम्। अवसरेऽस्मिन् श्रीजगन्नाथविश्वकोषप्रकल्पस्य, यानस्थापनस्थानकयोः च उद्घाटनं संस्थानकुलसचिवेन आचार्यरामानुजदेवनाथवर्येण कृतम्। डा. सुकान्तकुमारसेनापतिः सर्वेभ्यः धन्यवादान् व्याहरत्। सभासञ्चालनम् आचार्यहरेकृष्णमहापात्रः अकरोत्।



लोकार्पणावसरस्य किञ्चन दृश्यम्

**राष्ट्रियप्रातिभसमारोहः** – २६–३०.०१.२०११ मिते काले पुर्याम् आयोजितायां महाविद्यालयविश्वविद्यालयस्तरीयायां छात्रप्रातिभप्रतियोगितायां (Glory Festival-2011) इत्यस्यां श्रीसदाशिवपरिसरः सर्वप्रथमस्थानं प्राप्नोत्। आचार्यद्वितीयवर्षच्छात्रा सङ्गीतामहारणा सङ्गीते प्रथमस्थानं, शिक्षाशास्त्रिच्छात्रः शुभेन्दुकुमारमिश्रः पत्रकारसम्मेलने प्रथमस्थानं, शिक्षाशास्त्रिच्छात्रः राकेशकुमारपाण्डेयः हिन्दी वादविवादे प्रथमस्थानं, आचार्यद्वितीयवर्षीया छात्रा गायत्री राउतरायः ओडिशीनृत्ये द्वितीयस्थानं, शास्त्रितृतीयवर्षीयः छात्रः सुव्रतषडङ्गी मूकाभिनयने द्वितीयस्थानं, सामूहिकतया एकाङ्कनाट्यप्रदर्शने च प्रथमस्थानं प्राप्तवन्तः।

## शृङ्गेरीस्थ-राजीवगान्धीपरिसरे सम्पन्नाः कार्यक्रमाः




व्याख्यानमालायां भाषमाणः मणिद्राविडवर्यः

**श्रीशारदाविशिष्टव्याख्यानमाला** – ०३.०१.११ दिनाङ्के श्रीशारदाविशिष्टव्याख्यानमालायाः षष्ठं कुसुमं मैलापुरस्थ-संस्कृतमहाविद्यालयस्य मीमांसाविभागाचार्यः श्रीमणिद्राविडः प्राफुल्लयत्। पूर्वोत्तरमीमांसयोः प्रकाण्डपण्डितोऽयं आचार्यः वेदान्तशास्त्रे 'अखण्डार्थविचारः' इति विषये विशिष्टं व्याख्यायात्। परिसरप्राचार्यः ए.पी.सच्चिदानन्दः आचार्यस्यास्य विद्वत्त्वं सुजनतां श्रीचरणानां च अनुग्रहभाक्त्वं विषयबोधनापाटवादिकं सर्वं स्वाध्यक्षभाषणे आविरकरोत्। डा. नवीनहोळ्ळः सभां समचालयत्।

२४.०१.११ दिनाङ्के श्रीशारदाविशिष्टव्याख्यानमालायाः अन्तिमं व्याख्यानं समापनसमारोहश्चानुष्ठितः। समापनसमारोहेऽस्मिन् विशिष्टाभ्यागतत्वेन विशिष्टव्याख्यातृत्वेन च तिरुपतिस्थस्य राष्ट्रियसंस्कृतविद्यापीठस्य शिक्षाविभागस्य आचार्यः डा. वि. मुरलीधरशर्मा समागमत्। सः 'व्यक्तित्वम्' इति विषयमधिकृत्य विशिष्टमनोवैज्ञानिकशैल्या सुरललितगिरा छात्रान् सर्वांश्च व्यबोधयत्। सभाध्यक्षेन प्राचार्येण सच्चिदानन्दवर्येण आचार्यमुरलीधरशर्मणः बहुमुखी प्रतिभा प्रकटिता। डा. नवीनहोळ्ळ-डा. कृष्णानन्तपद्मनाभयोः संयोजकत्वे ऐषमः श्रीशारदाविशिष्टव्याख्यानमाला सुसम्पन्ना।

**वाक्यार्थपरिषद्** – ०४.०१.११ दिनाङ्के वाक्यार्थपरिषदः षष्ठाधिवेशनं मीमांसाविभागाध्यक्षस्य डा. सुब्राय वि. भट्टस्य पर्यवेक्षकत्वे आयोजितम्। तत्रैते अध्यापकाः अधोनिर्दिष्टान् विषयानधिकृत्य वाक्यार्थान् प्रास्तुवन्- **डा. राघवेन्द्रभट्टः** चतुर्विधं काव्यम्, **डा. हरिप्रसादः** संज्ञानात्मकसिद्धान्तः, **डा. गणेश टि. पण्डितः** अन्तर्द्वन्द्वोपशमनोपायाः, **डा. के. गिरिधररावः** कक्ष्याव्यवहारविश्लेषणम्, **डा. डि. वेणुगोपालरावः** व्यवहारे मूलप्रवृत्तीनां प्रभावः चेति। डा. रामचन्द्रजोयिस् सभां समचालयत्।

२५.०१.११ दिनाङ्के वाक्यार्थपरिषदः समापनसमारोहः आयोजितः। चेन्नैनगरस्थस्य मैलापुरसंस्कृतमहाविद्यालयस्य निवृत्तमीमांसाप्राध्यापकः ज्ञानवयोवृद्धः आचार्यः ई. बालसुब्रह्मण्यशास्त्री मुख्याभ्यागतत्वेन समागत्य पर्यवेक्षकत्वं च निरूह्य 'विरोधाधिकरणम'धिकृत्य विशिष्टवाक्यार्थकौशलविधिं छात्राणामध्यापकानाञ्चोपकाराय मार्गयत्। तत्र अन्तिमेऽस्मिन् अधिवेशने व्याकरणप्राध्यापकः **डा. कृष्णानन्तपद्मनाभः** 'कालाठ्ठञ्', नव्यन्यायप्राध्यापकः **श्रीश्यामसुन्दरभट्टः** 'धात्वर्थः' इति विषये च वाक्यार्थं प्रस्तूतवन्तौ। परिसरप्राचार्यः ए. पी. सच्चिदानन्दः 'ऐषमः वाक्यार्थपरिषद् सुष्ठु सम्पन्ना छात्राश्च उपकृता' इति स्वाध्यक्षभाषणे समबोधयत्। डा. रामचन्द्रजोयिस्-श्रीवेङ्कटेशताताचार्यौ प्रतिसभम् अध्यापकानां वाक्यार्थान् सुष्ठु समायोजयेताम्।

**राजीवगान्धि-अन्ताराष्ट्रियविशिष्टव्याख्यानम्** – १७.०१.११ दिनाङ्के परिसरेऽस्मिन् ऐदम्प्राथम्येन राजीवगान्धि-अन्ताराष्ट्रियविशिष्टव्याख्यानम् आयोज्यत। तत्र प्राचार्यस्याध्यक्ष्ये प्रातः १०.३० वादने अमेरिकास्थ-कोलम्बियाविश्वविद्यालयस्य मध्यपूर्वीयदक्षिणैशिय-आफ्रिकीयविद्याविभागस्य आचार्या एलिशन्बुश्महोदया 'रीतिकालीनहिन्दीसाहित्यस्य ऐतिहासिकमध्ययनम्' इति विषये हिन्दीभाषया व्याख्यानमकरोत्। हिन्दीप्राध्यापिका डा. रेखाकुमारीपाण्डेया सभां सञ्चालितवती।





व्याख्यानकार्यक्रमे भाषमाणः आचार्यः शेल्डन् ए.पोलकः

अपराह्णे ०४.३० वादने कुलपतेः आचार्यराधावल्लभत्रिपाठिनः आध्यक्ष्ये भारतशासनस्य राष्ट्रपतिसंस्कृतविद्वत्सम्मानभाजनं पद्मश्रीविभूषितः अमेरिकास्थस्य कोलम्बियाविश्वविद्यालयस्य मध्यपूर्वीयदक्षिणैशिय-आफ्रिकीयविद्याविभागस्य रान्सफोर्डपिवलियम् वि. आचार्यः शेल्डन् ए. पोलकः 'रसेतिहासे व्याख्येयपरिवर्तनम्' इति विषये शोधगर्भकं व्याख्यानमकरोत्। रसस्याभिव्यक्तौ अलङ्कारग्रन्थानां मीमांसाग्रन्थानां च सान्दर्भिकीं तुलनां विधाय विशिष्टं शोधपूर्णव्याख्यानं संस्कृतभाषया एव अकरोत्। कुलपतिः अन्ताराष्ट्रियविशिष्टव्याख्यानस्य महत्त्वमुल्लिख्य शेल्डनपोलक्महोदयस्य मतम् आलङ्कारिकदृष्ट्या किञ्चित् समैक्षत। परिसरप्राचार्यः ए. पी. सच्चिदानन्दः विशिष्टाभ्यागतानां परिचयं सम्माननं चाकरोत्। डा. राघवेन्द्रभट्ट-डा. सोमनाथसाहुमहोदययोः संयोजकत्वे कार्यक्रमोऽयं सुसम्पन्नतां गतः।

०४.०३.११ दिनाङ्के परिसरेऽस्मिन् राजीवगान्धिस्मारकम् अन्ताराष्ट्रियव्याख्यानं प्रावर्तत। तत्र प्रातः १०.३० वादने आचार्यः वसुन्धरा-फिलियोजामहोदयः 'विद्यारण्यमुनिः विजयनगरसाम्राज्यञ्च' इति विषयमधिकृत्य अत्यन्तं शोधपूर्णं व्याख्यानम् अकथयत्। तत्र प्राचार्यः ए.पी. सच्चिदानन्दः शृङ्गेरीपीठाधीश्वरपरम्परायां श्रीमद्विद्यारण्यस्वामिनां वैशिष्ट्यं महत्त्वञ्च आध्यक्ष्यभणितौ प्रास्तौत्। तस्मिन्नेव दिने अपराह्णे ३.३० वादने श्रीसद्विद्यासञ्जीविनीसंस्कृतमहापाठशालायाः अध्यक्षस्य आचार्यस्य श्रीमतः एम्. ए. नागराजभट्टस्याध्यक्ष्ये फ्रान्स्देशस्य संस्कृतविभागाचार्यः डा.प्येरी. सेल्वैन्, फिलियोजामहोदयः राजीवगान्धिस्मारकस्य अन्ताराष्ट्रियव्याख्यानस्य द्वितीयं कुसुमं प्राफुल्लयत्। तेन 'शैवसिद्धान्तदृष्ट्या शिवस्य देहात्मत्वेन मन्दिरसम्प्रत्ययः' इति विषयमधिकृत्य विशिष्टं व्याख्यानं प्रस्तुतम्। देवालयादीनां स्थापत्यनिर्माणे कथं शैवदर्शनस्य तत्त्वानि सहकुर्वन्तीत्यादिविषयान् फिलियोजामहोदयः सम्यगुपस्थापयत्। आचार्यः विद्वान् नागराजभट्टः आध्यक्ष्यं निरूह्य तन्त्रशास्त्रस्य आगमशास्त्रस्य च सम्बन्धः व्याकरणदर्शनादिशास्त्रान्तरेषु दरीदृश्यत इति प्राचीकटत्। परिसरप्राचार्यः आचार्यः ए.पि.सच्चिदानन्दः सर्वांश्च सभ्यान् स्वागतं व्याहरत्। डा. राघवेन्द्रभट्ट-डा.सोमनाथसाहुमहोदययोः संयोजने कार्यक्रमः सुसम्पन्नः।

**वार्षिकोत्सवः** - २०.०१.११ दिनाङ्के परिसरस्यास्य वार्षिकोत्सवः समाचर्यत। प्रातः १०.३० वादने शृङ्गेरीशारदापीठाधीश्वराणां जगद्गुरूणां श्रीश्रीभारतीतीर्थमहास्वामिनां दिव्यसन्निधौ वाराणसेयसम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य कुलपतिचरस्य आचार्यस्य अभिराजराजेन्द्रमिश्रस्य विशिष्टाभ्यागतत्वे परिसरप्राचार्यः ए.पी. सच्चिदानन्दः वैदिकमङ्गलैः श्रीचरणेभ्यः फलपुष्पसमर्पणपूर्वकं सभ्यान् सर्वानपि स्वागतं व्याहरत्। शिक्षाविभागप्राध्यापकः डा चन्द्रकान्तः वार्षिकवृत्तान्तं न्यवेदयत्। विशिष्टाभ्यागताः क्रीडासांस्कृतिकशैक्षिकस्पर्धासु विजेतृभ्यः पुरस्कारान् प्रायच्छन्। अभ्यागतः आचार्यः अभिराजराजन्द्रमिश्रः 'संस्कृतस्य प्रगतिं न केनापि रोद्धुं शक्यते। सा गीर्वाणवाणी सर्वदा अमृता अमरा' चेत्युक्त्वा संस्कृतवाङ्मयस्य वैभवमहिमानं वर्णयत्। स्वर्णपदकभाजश्च्छात्रान् श्रीचरणाः अन्वगृह्णन्। ऐषमः कार्यक्रमे वार्षिकी पत्रिका 'शारदा' 'शब्दान् जानीमहे' च इति द्वे पुस्तके उन्मीलिते। संस्कृतस्य शास्त्रपरम्परा अनुदिनं संवर्धनीया, तस्मिन् च पथि विद्यापीठमिदं प्रयतमानं दृश्यते' इति ब्रुवन्तः सन्तुष्टान्तरङ्गास्ते सर्वान् विद्यापीठपरिवारान् अन्वग्रहीषुः। न्यायविभागाध्यक्षः डा नवीनहोळळः सभां समचालयत्। अपराह्णे ३.०० वादने अभिराजराजेन्द्रमिश्रस्य कवितावाचनप्रमुखैः कार्यक्रमैः सह छात्राणां सङ्गीत-नृत्य-योग-नाटकादिसांस्कृतिककार्यक्रमाः समभवन्।



वार्षिकोत्सवावसरे भाषमाणाः श्रीश्रीभारतीतीर्थस्वामिचरणाः

**गणराज्योत्सवः** - २६.०१.११ दिनाङ्के परिसरेऽस्मिन् गणराज्योत्सवः पर्यपालयत। शारीरिकप्रशिक्षकस्य एच. डि. रामचन्द्रस्य सहयोगेन प्रातः ०८.३० वादने परिसरप्राचार्यः ए.पी. सच्चिदानन्दः राष्ट्रियध्वजमुदतोलयत्। छात्राः अध्यापकाश्च सर्वे मिलित्वा राष्ट्रगानमकुर्वन्। अनन्तरं शिक्षाशास्त्रप्राध्यापकस्य डा. हरिप्रसादस्य संयोजकत्वे छात्राः सांस्कृतिककार्यक्रमान् प्रदर्शितवन्तः। अध्यापकाश्च गणराज्योत्सवस्य महत्त्वमौचित्यञ्चावबोधयन्। प्राचार्यः ए.पी. सच्चिदानन्दः आध्यक्ष्यमूढ्वा आध्यक्ष्यभणितिं समर्पयत्।

**छात्रप्रातिभसमारोहे परिसरच्छात्राः** - २२.०१.२०११ दिनाङ्कतः २५.०१.२०११ पर्यन्तं तिरुपतिस्थे राष्ट्रियसंस्कृतविद्यापीठे प्रवृत्ते छात्रप्रातिभसमारोहे परिसरच्छात्राः भागं गृहीत्वा पुरस्कारभाजः अभवन्। तत्र इमे छात्राः पुरस्कारान् प्राप्तवन्तः-

**विश्वनाथभट्टः** वेदान्तभाषणे (स्वर्णपदकं) साङ्ख्यभाषणे (रजतपदकं) च, **मुकेशकुमारः** ज्योतिषभाषणे (रजतपदकं), **राघवेन्द्रः** न्यायभाषणे (रजतपदकं), **जानपदनृत्ये समूहः** (प्रथमपुरस्कारं), **नाटके समूहः** (द्वितीयपुरस्कारम्)।




वार्षिकोत्सवावसरे स्वाभिप्रायं प्रकटयन् आचार्यः राजेन्द्रमिश्रः

**वाग्वर्धिनीमहोत्सवः** - १०.०२.११ दिनाङ्के वाग्वर्धिनीपरिषदः समापनसमारोहः वाग्वर्धिनीमहोत्सवत्वेन आचरितः। तत्र राष्ट्रियसंस्कृतसंस्थानस्य कुलसचिवः आचार्यः रामानुजदेवनाथः मुख्याभ्यागतत्वेन समागत आसीत्। 'अनादिकालादारभ्य प्रवर्त्तमानानां चिन्तनानां समवायः एव संस्कृतवाङ्मयम्। अतः अद्यापि जगति श्रेष्ठतमं स्थानं भजत इदं संस्कृतवाङ्मयम्। सर्वे च संस्कृतच्छात्राः संस्कृतवाङ्मये विद्यमानान् विशिष्टविचारान् वैज्ञानिकविषयाँश्च संशोध्य प्रकाशमानेतुं प्रयत्नशीलाः भवेयु'रिति सः अकथयत् किं च राजीवगान्धीपरिसरस्य सर्वविधविजयवैजयन्तीप्राप्ताविदं वाग्वर्धिनीपरिषदेव कारणमिति सहर्षमभाषत। वाग्वर्धिनीमहोत्सवेऽस्मिन् विविधक्षेत्रे परिश्रमं कृतवद्भ्यः छात्रेभ्यः कुलसचिवः विशिष्टपुरस्कारान् प्रायच्छत्। परिसरप्राचार्यः ए.पी. सच्चिदानन्दः आध्यक्ष्यं निरवहत्। वाग्वर्धिनीपरिषदः सदस्यः श्रीमुकेशकुमारः सभां चालितवान्। पत्रिकाकार्यदर्शी श्रीविश्वनाथहेगडे सर्वेभ्यः स्वागतं व्याहरत्। परिषदः अध्वदर्शिनौ डा.हरिप्रसाद-डा. सूर्यनारायणभट्टयोः सुष्ठु मार्गदर्शने कार्यक्रमः सुसम्पन्नः।




वाग्वर्धिनीमहोत्सवे छात्रान् उद्बोधयन् आचार्यः रामानुजदेवनाथन्

**शशिप्रभाजैनवर्यायाः परिसरसन्दर्शनम्** - १८.०२.११ दिनाङ्के नवदेहलीस्थस्य श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठस्य वरिष्ठाचार्या डा. शशिप्रभाजैन परिसरममुं पर्यवेक्षकत्वेन समागता। छात्राणां गुणवत्तायाः अभिवृद्धौ अध्ययनप्रगतौ च कथं मार्गः अनुसर्त्तव्यः, के चोपायाः अवलम्बनीयः इत्येतत्सर्वं परिसरच्छात्रानुद्दिश्य तया सुष्ठु उपदिष्टम्। परिसरस्य प्राचार्यः तस्याः दीर्घकालिकं सेवानुभवं स्मारं स्मारं भृशं प्राशंसत् शिक्षायाः परिवर्तितमुखं च आविरकरोत्।

**अभिषेकनाटकप्रस्तुतिः**-०८.०३.२०११ दिनाङ्के मन्त्रालयस्थित-श्रीगुरुसार्वभौमसंस्कृतमहाविद्यालयपक्षतः आयोजितायां नाटकसप्ताहस्पर्धायाम् परिसरच्छात्राः भागं गृहीत्वा अभिषेकनाटकञ्च सम्यगभिनीय पञ्चविंशतिसहस्ररूप्यकैः (रू. २५,०००/-) प्रथमपुरस्कारभाजः अभवन्।

**बालचरसङ्घप्रशिक्षणम्** - २१-२७.०२.११ मिते काले शिक्षाशास्त्रिच्छात्राणां बालचरसङ्घप्रशिक्षणं बेङ्गलूरुनिकटस्थे दोड्डबळ्ळापुरनगरे संवृत्तम्।

# बेङ्गलूरुस्थ-विश्वसंस्कृतपुस्तकमेलायां राष्ट्रियसंस्कृतसंस्थानेन लोकार्पिताः ग्रन्थाः

१. **गजाननग्रन्थावली** पण्डितगजाननरामचन्द्रकरमलकरविरचितानां ग्रन्थानाम् आवलिः- (सम्पा.) आचार्यः मिथिलाप्रसादत्रिपाठी

२. **आचार्यरतिनाथझारचनावली** - (सम्पा.) डा. सूर्यप्रकाशव्यासः

३. **शिवशतकम्** - (सम्पा.) डा. रमाकान्तपाण्डेयः

४. सीताकान्तमहापात्रप्रणीतं **भारतवर्षम्** - (अनु.) डा. भागीरथिनन्दः

५. **ध्वनिमीमांसा** - (सम्पा.) आचार्यः रमेशकुमारपाण्डेयः

६. **आयतिः** - (सम्पा.) आचार्यः राधावल्लभः त्रिपाठी

७. **लघुपद्यप्रबन्धत्रयी** - (सम्पा.) आचार्यः रामजीठक्कुरः

८. **लहरीपञ्चकम्** - (टीकाकारः) वाचस्पतिभुवनेश्वरकरशर्मा

९. **कवितावलिः** (महावीरप्रसादद्विवेदिनः) - (सम्पा.) आचार्यः राधावल्लभः त्रिपाठी

१०. **राष्ट्रवाणी** (रामनाथपाठकप्रणयी) - (सम्पा.) आचार्यः राधावल्लभः त्रिपाठी

११. **बोधिचर्यावतारः** - (सम्पा.) आचार्यः सङ्घसेनसिंहः

१२. **अभिधर्मकोशः** - (सम्पा.) आचार्यः सङ्घसेनसिंहः

१३. व्युत्पत्तिवादस्य सुदर्शनाचार्यविरचिता **'आदर्श' टीका** - (सम्पा.) आचार्यः हरेरामत्रिपाठी

भट्टमथुरानाथशास्त्रि' मञ्जुनाथ 'ग्रन्थावल्यां प्रकाशितग्रन्थाः - (सम्पा.) आचार्यः देवर्षिकलानाथशास्त्री, डा. रमाकान्तपाण्डेयः

१४. **संस्कृतगाथासप्तशती** - भागः-१, तृतीयः खण्डः

१५. **उपन्यासः कथाश्च** - द्वितीयः खण्डः

१६. **निबन्धः ललितनिबन्धश्च** - भागः-२, द्वितीयः खण्डः

## पुनर्मुद्रणप्रकाशनयोजना

१७. **सुभाषितरत्नसंदोहः**

१८. **कर्मविपाकसंहिता**

१९. **भाट्टदीपिका** (चतुर्षु भागेषु)

२०. **सुभाषितसाहस्त्री**

२१. **भारतीयम् अर्थशास्त्रम्**

२२. **परिभाषेन्दुशेखरः**

२३. **कात्यायनयज्ञपद्धतिविमर्शः**

२४. **युभातः संस्कृतं प्रति**

२५. **चन्द्रगोलविमर्शः**

२६. **अनुसन्धानस्य प्रविधि-प्रक्रिया**

## दृश्य-श्रव्यसान्द्रमुद्रिका

२७. **कविभास्करी** (शृङ्खला-२)

२८. **भासनाटकचक्रम्**




संस्कृतग्रामस्य किञ्चन दृश्यम्

## गङ्गानाथझापरिसरप्रकाशनानि

२९. **न्यायसूत्रविवृतिः** - (सम्पा.) डॉ. विश्वम्भरनाथः गिरिः

३०. **शब्दशास्त्रमहार्णवः** - (सम्पा.) डॉ. ललितकुमारत्रिपाठी

३१. **शब्दार्थतर्कामृतम्** - (सम्पा.) डॉ. ललितकुमारत्रिपाठी

३२. **गङ्गालहरी** - (सम्पा.) डॉ. ललितकुमारत्रिपाठी

३३. **शब्दामृतम्** - (सम्पा.) डॉ. ललितकुमारत्रिपाठी

३४. **सकलरससारसंग्रहः** - (सम्पा.) डॉ. जनार्दनप्रसादपाण्डेयः

३५. **राघवोल्लासमहाकाव्यम्** - (सम्पा.) डॉ. रामकिशोरः झा

३६. **सत्योपाख्यानम्** - (सम्पा.) डॉ. शैलजापाण्डेया

३७. **विष्णुभक्तिकल्पलता** - (सम्पा.) श्रीरामचन्द्रः



ग्रन्थलोकार्पणकार्यक्रमस्य कानिचन दृश्यानि


Sanskritavarta : Quarterly News Bulletin of Rashtriya Sanskrit Sansthan Vol.III Issue No.11 Pub. by the Registrar for Rashtriya Sanskrit Sansthan, 56-57, Institutional Area, Janakpuri, New Delhi-110058 & Printed at D.V. Printers, 97-U.B. Jawahar Nagar, Delhi-110007